अकारान्तात् सर्वनाम्नः परो ङेः स्मैः स्यात् । सर्वस्मै । विश्वस्मै । तीयाद् वा । द्वितीयस्मै । द्वितीयाय । अथ सर्वनामानि । सर्व-विश्व-उभ-उभय-अन्य-अन्यतर-इतर-कतर-कतम- डतर-डतम-वृत्-त्व-नेम-सम-सिम-पूर्व-पर-अवर-दक्षिण -उत्तर-अधराणि व्यवस्थायाम् । स्वम् अज्ञातिधनाख्यायाम् । अन्तरम् बहिर्योगोपसंव्यानयोरुपरि । वृत्-त्यद्-तद्-यद्-अदस्-इदम्-एतद्-एक-किम्-द्वि-युष्मद्-अस्मद्-भवन्तः । इत्यसंज्ञायाम् ।।२५।।

१०४) ङसिः स्मात् ।।२६।।
अकारान्तात् सर्वनाम्नः परो ङसिः स्मात् स्यात् । सर्वस्मात् ।।२६।।

१०५) ङिः स्मिन् ।।२७।।

अकारान्तात् सर्वनाम्नः परो ङिः स्मिन् स्यात् । सर्वस्मिन् ।।२७।।

१०६) विभाष्येते पूर्यादेः ।।२८।।

पूर्वादि नवशब्देभ्यः परौ स्मात्स्मिनौ विभाष्येते । पूर्वस्मात् । पूर्वात् । पूर्वस्मिन् । पूर्वे । तीयाच्च । तृतीयस्मात् । तृतीयात् । तृतीयस्मिन् । तृतीये ।।२८।।

१०७) सुरामि सर्वतः ।।२९।।

अकारान्तात् सर्वनाम्नः सर्वतः स्त्रीकृतेऽप्यामि परे सुरागमः स्यात् । सर्वेषाम् । सर्वासाम् ।।२९।।

१०८) जस् सर्व इ ।।३०।।

अकारान्तात् सर्वनाम्नः परो जस् सर्व इः स्यात् । सर्वे ।।३०।।

१०९) अल्पादेर्वा ।।३१।।

अल्पादेर्गणात् परो जस् इर्वा स्यात् । अल्पे । अल्पाः । अल्प-प्रथम-चरम-तय-अय-कतिपय-नेम-अर्ध-पूर्वादयश्च नव ।।३१।।

११०) द्वन्द्वस्थाच्च ।।३२।।

द्वन्द्वस्थसर्वनाम्नः परो जस् इर्वा स्यात् । पूर्वोत्तरे । पूर्वोत्तराः ।।३२।।

१११) नान्यत्सार्वनामिकम् ।।३३।।

द्वन्द्वस्थस्य सर्वनाम्नोऽन्यत् सार्वनामिकं कार्यं न स्यात् । दक्षिणोत्तरपूर्वाणाम् ।।३३।।

११२) तृतीया समासे च ।।३४।।

तृतीयया योगे समासेऽसमासे च सार्वनामिकं कार्यं न स्यात् । मासेन पूर्वात् । मासेनावराः ।।३४।।

११३) बहुव्रीहौ ।।३५।।

बहुव्रीहिसमासे सार्वनामिकं कार्यं न स्यात् । वस्त्रान्तरवसनान्तराः । अप्राधान्याद् 'द्वन्द्वस्थाच्च' (११०) इति वा न ।।३५।।

११४) दिशां वा ।।३६।।

दिशां बहुव्रीहौ सार्वनामिकं कार्यं वा स्यात् । उत्तरपूर्वस्यै । उत्तरपूर्वायै ।।३६।।

११५) श्रद्धायाः सिर्लोपः ।।३७।।

श्रद्धायाः परः सिर्लोपमाप्नोति । शाला ।।

११६) टौसौरे ।।३८।।

श्रद्धायाः टौसोः परयोरेः स्याते । शालया । शालयोः ।।३८।।

११७) सम्बुद्धौ च ।।३९।।

श्रद्धायाः सम्बुद्धौ एः स्यात् । हे माले ।।३९।।

११८) ह्रस्वोऽम्बार्थानाम् ।।४०।।

द्विस्वराम्बार्थानां श्रद्धानां सम्बुद्धौ ह्रस्वः स्यात् । हे अम्ब । हे अक्क । हे अल्ल । हे अत्त । द्विस्वरेति किम् ? अम्बिके ॥४०॥

११९) ओरिम् ॥४१॥

श्रद्धायाः पर ओरिमाप्नोति । शाले ॥४१॥

१२०) ङवन्ति यै यास् यास् याम् ॥४२॥

श्रद्धायाः पराणि ङवन्ति वचनावि यै यास् यास् याम् यथासंख्यं स्युः । शालायै । शालायाः । शालायाः । शालायाम् ॥४२॥

१२१) सर्वनाम्नस्तु ससवो ह्रस्वपूर्वाश्च ॥४३॥

श्रद्धायाः सर्वनाम्नः पराणि ङवन्ति वचनानि यै यास् यास् याम् सह सुना स्युः, ह्रस्वपूर्वाश्च । सर्वस्यै । सर्वस्याः । सर्वस्याः । सर्वस्याम् ॥४३॥

१२२) द्वितीयातृतीयाभ्यां वा ॥४४॥

आभ्यां पराणि ङवन्ति वचनानि यै यास् यास् याम् सह सुना वा स्युः, ह्रस्वपूर्वाश्च । द्वितीयस्यै । द्वितीयायै । तृतीयस्यै । तृतीयायै । इत्यादि ॥४४॥

१२३) नद्या ए आस् आस् आम् ॥४५॥

नद्याः पराणि ङवन्ति वचनानि ए आस् आस् आम् यथासंख्यं स्युः । नद्यै । नद्याः । नद्याः । नद्याम् । वध्वै । वध्वाः । वध्वाः । वध्वाम् । अलक्ष्म्यै पुंसे स्त्रियै वा ॥४५॥

१२४) सम्बुद्धौ ह्रस्वः ॥४६॥

नद्याः सम्बुद्धौ ह्रस्वः स्यात् । हे नदि । हे वधु ॥४६॥

१२५) अम्शसोरादिर्लोपम् ॥४७॥

नद्याः परयोरम्शसोरादिर्लोपमाप्नोति । (नदीम्।) नदीः (वधूम्।) वधूः । पुंसीदूदभ्यां सश्च नः । वातप्रमीन् । हूहून् ॥४७॥

१२६) ईकारान्तात् सिः ॥४८॥

नदी संज्ञकाद् ईकारान्तात् सिर्लोपमाप्नोति । नदी । ईकारान्तादिति किम् ? लक्ष्मीः ॥४८॥

१२७) व्यञ्जनाच्च ॥४९॥

व्यञ्जनात् सिर्लोपमाप्नोति । वाक् ॥४९॥

१२८) अग्नेरमोऽकारः ॥५०॥

अग्नेः परो अमोऽकारो लोपमाप्नोति । अग्निम् । धेनुम् ॥५०॥

१२९) औकारः पूर्वम् ॥५१॥

अग्नेः पर औकारः पूर्वस्वरमाप्नोति । अग्नी । धेनू । स्त्रेर्न । अतिस्त्रियौ नरौ ॥५१॥

१३०) शसोऽकारः सश्च नोऽस्त्रियाम् ॥५२॥

अग्नेः परः शसोऽकारः पूर्वस्वरमाप्नोति, यस्य च नोऽस्त्रियां स्यात् । अग्नीन् । पटून् । अस्त्रियां किम् ? मतीः । धेनूः ॥५२॥

१३१) टा ना ॥५३॥

अग्नेः परः टा ना स्यात्, अस्त्रियाम् । (अग्निना) अतिस्त्रिणा । पटुना । अस्त्रियां किम् ? गत्या । धेन्वा ॥५३॥

१३२) अदोऽमुश्च ॥५४॥

अदसोऽस्त्रियाम् अमुः स्यात् । टा ना च । अमुना । अस्त्रियामिति किम् ? अमुया ॥५४॥

१३३) इरेदुरोज्जसि ॥५५॥

लिङ्गस्य इउः एत् उः ओत् जसि परे स्यात् । अग्नयः । धेनवः ॥५५॥

१३४) सम्बुद्धौ च ॥५६॥

सम्बुद्धौ इः एत् उः ओत् स्यात् । हे अग्ने । हे धेनो ।

१३५) ङे ॥५७॥

ङयि परे इः एत् उः ओत् स्यात् । (अग्नये ।) अतिस्त्रिये । धेनवे ॥५७॥

१३६) ङसिङसोरलोपश्च ॥५८॥

अग्नेः परयोः ङसिङसोर्लोपः, इरेच्च उरोच्च स्यात् । (अग्नेः । अग्नेः।) अतिस्त्रेः । (अतिस्त्रेः) धेनोः । (धेनोः) ॥५८॥

१३७) गोश्च ॥५९॥

गोः परयोः ङसिङसोरस्य लोपः स्यात् । गोः । गोः । एदोभ्यां च । सेः । द्योः ॥५९॥

१३८) ङिरौ सपूर्वः ॥६०॥

अग्नेः परो ङिः पूर्वस्वरेण सह औः स्यात् । अग्नौ । धेनौ ॥६०॥

१३९) सखिपत्योर्ङिः ॥६१॥

सखिपत्योङिरेव औ स्यात् । सख्यौ । पत्यौ ॥६१॥

१४०) ङसिङसोरुमः ॥६२॥

सखिपतिभ्यां परयोर्ङसिङसोऽकार उमाप्नोति । सख्युः । पत्युः । नामधातुखीत्योः । सखायं पतिं वेच्छतः । सख्युः । पत्युः ॥६२॥

१४१) ऋदन्तात् सपूर्वः ॥६३॥

ऋकारान्तात् परयोर्ङसिङसोरकारः पूर्वेण स्वरेण सह उमाप्नोति । पितुः । (पितुः।) मातुः । (मातुः) ॥६३॥

१४२) आ सौ सिलोपश्च ॥६४॥

ऋकारान्तस्य सौ परे आ स्यात् । सिलोपश्च । पिता । माता ॥६४॥

१४३) अग्निवच्छसि ॥६५॥

ऋदन्तस्य शसि परेऽग्निवत् कार्यं स्यात् । पितन् । स्त्रियां मातृः ॥६५॥

१४४) अर्डौ ॥६६॥

ऋदन्तस्य ङौ परे अर् स्यात् । नरि । मातरि ॥६७॥

१४५) घुटि च ॥६७॥

ऋदन्तस्य घुटि परे अर् स्यात् । मातरम् । मातरौ ॥६७॥

१४६) धातोस्तृशब्दस्यार् ॥६८॥

धातोर्विहितस्य तृशब्दस्य ऋत् घुटि परे आर् स्यात् । कर्तारौ । कर्तारः । क्रुशस्तुनस्तृच् पुंस्यसम्बुद्धिघुटि । क्रोष्टा । क्रोष्टारौ । सम्बुद्धौ तु, हे क्रोष्टो । शसादौ स्वरे न वा । क्रोष्ट्रा । क्रोष्टुना । स्त्रियां च । क्रोष्ट्री ॥६८॥

१४७) स्वस्त्रादीनां च ॥६९॥

स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तृ-शब्दानां घुटि आर् स्यात् । स्वसारौ । नप्तारौ ॥६९॥

१४८) आ च न सम्बुद्धौ ॥७०॥

ऋदन्तस्य सेः सम्बुद्धौ आर् आ च न स्यात् । अर् एव । हे कर्तः ।.७०॥

१४९) ह्रस्वनदीश्रद्धाभ्यः सिर्लोपम् ॥७१॥

एभ्यः परः सम्बुद्धिः सिर्लोपमाप्नोति । हे देव । हे उपकुम्भ । हे नदि । हे श्रद्धे । पूर्वेण स्वरेण सह एतश्च । हे से ॥७१॥

१५०) आमि च नुः ॥७२॥

एभ्यः पर आमि नुराग मः स्यात् । देवानाम् । अग्नीनाम् । धेनूनाम् । पितृणाम् । नदीनाम् । वधूनाम् । शालानाम् ॥७२॥

१५१) त्रेस्त्रयश्च ॥७३॥

त्रेरामि परे त्रयादेशो नुश्च स्यात् । त्रयाणाम् । सम्बन्धोक्तेः, प्रियत्रीणाम् ॥७३॥

१५२) चतुरः ॥७४॥

चत्वार् शब्दस्यामि परे नुः स्यात् । चतुर्णाम् । षष्ठी किम् ? अतिचतुराम् ॥७४॥

१५३) संख्यायाः ष्णान्तायाः ॥७५॥

षकारनकारान्तायाः संख्यायाः सम्बन्धिन्यामि परे नुः स्यात् । षण्णाम् । पञ्चानाम् । आत्वेऽपि, अष्टानाम् ॥७५॥

१५४) कतेश्च जसशसोर्लुक् ॥७६॥

कतेः षनान्तसंख्यायाः सम्बन्धिनोर्जस्शसोर्लुक् स्यात् । कति । षट् । पञ्च ॥७६॥

१५५) नियो ङिराम् ॥७७॥

नियः परो ङिराम् स्यात् । नियाम् । ग्रामण्याम् ॥७७॥

इति श्रीमेरुतुङ्गसूरिरचितायां (कातन्त्र-) बालावबोधवृत्तौ

(द्वितीयाध्याये) नाम्निचतुष्टये प्रथमः पादः ॥

(अथ द्वितीयः पादः।)

१५६) न सखिष्टादावग्निः ॥१॥

सखिशब्दष्टादौ स्वरेऽग्निर्न स्यात् । सख्या । सख्ये । समासे अग्निवत् प्रियसखौ ॥१॥

१५७) पतिरसमासे ॥२॥

पतिशब्दष्टादौ स्वरेऽसमासेऽग्निर्न स्यात् । पत्या । पत्ये । असमासे किम् ? गोपतिना ॥२॥

१५८) स्त्री नदीवत् ॥३॥

स्त्रीशब्दो नदीवत् स्यात् । स्त्रियै । स्त्रीणाम् ॥३॥

१५९) स्त्र्याख्याावियुवौ वामि ॥४॥

स्त्रीलिङ्गे इयुवस्थानिनावामि परे वा नदीवत् स्याताम् । श्रीणाम् । श्रियाम् । भ्रूणाम् । भ्रुवाम् ॥४॥

१६०) ह्रस्वश्च ङवति ॥५॥

स्त्रीलिङ्गे ह्रस्व इदुदेव इयुवस्थानिनौ च ङवति परे वा नदीवत् स्याताम् । प्रियबुद्ध्यै । प्रियबुद्धये । धेन्वै । धेनवे । श्रियै । श्रिये । अतिभ्रुवै । अतिभ्रुवे । पुंसे स्त्रियै वा ॥५॥

१६१) नपुंसकात् स्यमोर्लोपो न च तदुक्तम् ॥६॥

नपुंसकात् स्यमोर्लोपः स्यात् । तयोः स्यमोश्च परयोरुक्तं कार्यं न स्यात् । पयः । तत् । नामिनः सम्बुद्धौ गुणो वा । हे वारि । हे वारे ॥६॥

१६२) अकारादसम्बुद्धौ मुश्च ॥७॥

अकारान्तान्नपुंसकात् स्यमो र्लोपो मुरागमश्च स्याद् असम्बुद्धौ । कुलम् । स्वम् । असम्बुद्धौ किम् ? हे कुण्ड ॥७॥

१६३) अन्यादेस्तु तुः ॥८॥

अन्यादिपञ्चशब्देभ्यः क्लीबे स्यमोर्लोपस्तुरागमश्च स्यात् । अन्यत् । अन्यतरत् । इतरत् । कतरत् । केतमत् । निषेधाद्, एकतरम् ॥८॥

१६४) औरीम् ॥९॥

सर्वस्मान्नपुंसकाद् औरीमाप्नोति । कुण्डे । पयसी ॥९॥

१६५) जस्शसोः शिः ॥१०॥

सर्वस्मान्नपुंसका जस्शसोः शिः स्यात् । कुलानि । पयांसि ॥१०॥

१६६) धुट्स्वराद् घुटि नुः ॥११॥

अनन्ययुग्धुडन्तात् स्वरान्ताच्च नपुंसकाद् घुटि नुः स्यात् । पयांसि । गोरङ्क्षि । पद्मानि ।

अनन्ययुक् किम् ? सुवल्गि ॥११॥

१६७) नामिनः स्वरे ॥१२॥

नाम्यन्तनपुंसकात् स्वरे नुः स्यात् । वारिणी ॥१२॥

१६८) अस्थिदधिसक्थ्यक्ष्णामनन्तष्टादौ ॥१३॥

एषां नाम्यन्तानां नपुंसकानामन्तष्टादौ स्वरेऽन् स्यात् । अस्थ्ना । दध्ना । सक्थ्ना । अत्यक्ष्णा ॥१३॥

१६९) भाषितपुंस्कं पुम्वद् वा ॥१४॥

भाषितपुंस्कं विशेषणरूपं नाम्यन्तं नपुंसकं टादि स्वरे वा पुंवत् स्यात् । मृदुने, मृदवे वस्त्राय ॥१४॥

१७०) दीर्घमामि सनौ ॥१५॥

नाम्यन्तनपुंसकं टादिस्वरे सनावामि दीर्घमाप्नोति । वारीणाम् । धेनूनाम् । पितॄणाम् ॥१५॥

१७१) नान्तस्य चोपधायाः ॥१६॥

नान्तलिङ्गस्योपधायाः सनावामि दीर्घः स्यात् । पञ्चानाम् ॥१६॥

१७२) घुटि, चासुम्बुद्धौ ॥१७॥

नान्तलिङ्गस्योपधाया अम्बुद्धौ घुटि दीर्घः स्यात् । राजा । सामानि । सम्बुद्धौ तु, हे राजन् ॥१७॥

१७३) सान्तमहतोर्नोपधायाः ॥१८॥

सकारान्तमहतोर्नस्योपधाया घुटि असम्बुद्धौ दीर्घः स्यात् । श्रेयान् । महान्तौ । सम्बुद्धौ, हे श्रेयन् ॥१८॥

१७४) अपश्च ॥१९॥

अप उपधाया घुटि असम्बुद्धौ दीर्घः स्यात् । आपः । नौ वा । स्वांपि, स्वंपि सरांसि । सम्बुद्धौ, हे शुच्यप् ॥१९॥

१७५) अन्त्वसन्तस्य चाधातोः सौ ॥२०॥

अन्तु अस् इत्यन्तस्याधातोरस्यासम्बुद्धौ सौ दीर्घः स्यात् । भवान् । सुपयाः गौः । भवन्तमिच्छन् भवान् । एवं, सुशिराः । अधातोः किम् ? बाणजः । सम्बुद्धौ, हे गोमन् ॥२०॥

१७६) इन्हन्पूषार्यम्णां शौ च ॥२१॥

एषामुपधायाः शौ असम्बुद्धौ सौ च परे दीर्घः स्यात् । दधीनि । भ्रूणहानि । सुपूषाणि । स्वर्यमाणि । दण्डी । वृत्रहा । पूषा । अर्यमा । शौ सौ च किम् ? दण्डिनौ । सम्बुद्धौ, हे दण्डिन् ॥२१॥

१७७) उशनः पुरुदंशोऽनेहसां सावनन्तः ॥२२॥

एषां मन्तोऽसम्बुद्धौ सौ अन् स्यात् । उशना । पुरुदंशा । अनेहा । सम्बुद्धौ, हे उशनः ॥२२॥

१७८) सख्युश्च ॥२३॥

सख्युरन्तोऽसम्बुद्धौ सौ अन् स्यात् । सखा । सम्बुद्धौ, हे सखे ॥२३॥

१७९) घुटि त्वै ॥२४॥

सख्युरन्तो घुटि ऐः स्यात् । सखायौ । क्लीबे न । सुसखीनि ॥२४॥

१८०) दिव उद् व्यञ्जने ॥२५॥

दिवो वस्य व्यञ्जने परे उत् स्यात् । द्युभ्यः । द्युगतः ॥२५॥

१८१) औ सौ ॥२६॥

दिवो वस्य सौ परे औः स्यात् । द्यौः । हे द्यौः ॥२६॥

१८२) वाम्या ॥२७॥

दिवे वस्य अमि वा आः स्यात् । द्याम् । दिवम् ॥२७॥

१८३) युजेरसमासे नुर्घुटि ॥२८॥

युजेर्धातोरसमासे घुटि नुः स्यात् । युङ् । युञ्जि । असमासे किम् ? अश्वयुक् ॥२८॥

१८४) अभ्यस्तादन्तिरनकारः ॥२९॥

अभ्यस्ते परे घुटि अन्त् नकाररहितः स्यात् । ददत् । जक्षतौ ॥२९॥

१८५) वा नपुंसके ॥३०॥

अभ्यस्तात् परो नपुंसके घुटि अन्त् वा नकाररहितः स्यात् । ददति । ददन्ति कुलानि ॥३०॥

१८६) तुदभादिभ्य ईकारे ॥३१॥

तुदादिभ्यो भादिभ्यश्च परोऽन्त् ईकारे नकाररहितः स्यात् । तुदती । तुदन्ती कुले । भाती । भान्ती स्त्री । तुदेत्यदन्तोक्तेरन्याकारादलोपः । पचन्ती ॥३१॥

१८७) हनेर्हेर्घिरुपधालोपे ॥३२॥

हनेरुपधालोपे कृते हश्च घः स्यात् । वृत्रघ्ना ॥३२॥

१८८) गोरौ घुटि ॥३३॥

गोलक्षितौकारान्तस्य घुटि औः स्यात् । गौ । द्यावौ ॥३३॥

१८९) अम्शसो रा ॥३४ ॥

ओकारन्तस्य अम्शसोः परयोः आः स्यात् । गाम् । अतिद्या ॥३४॥

१९०) पन्थिमन्थ्यृभुक्षीणां सौ ॥३५॥

एषामन्तः सौ परे आ स्यात् । पन्थाः । मन्थाः । हे ऋभुक्षाः ॥३५॥

१९१) अनन्तो घुटि ॥३६॥

एषामन्तो घुटि अन् स्यात् । पन्थानौ ॥३६॥

१९२) अघुटस्वरे लोपम् ॥३७॥

एषामन्तोऽघुटस्वरे लोपमाप्नोति । पथः । मथः । ऋभुक्षः । सुपथी स्त्री । मथा । ऋभक्षे । टादिवत् तद्धिते ये । पथ्यम् ॥३७॥

१९३) व्यञ्जने चैषां निः ॥३८॥

एषां तोऽघुट्स्वरे व्यञ्जने च लोपमाप्नोति । पथः । पथिभ्याम् । मन्थानमिच्छन् । मथीः । मथिगतः ॥३८॥

१९४) अनुषङ्गश्चाक्रुञ्चेत् ॥३९॥

अक्रुञ्चेरनिकारानुबन्धस्य चानुषङ्गोऽघुट्स्वरव्यञ्जनयोर्लोपमाप्नोति । विदुषः । विदुर्षा । वैदुष्यम् । महत्सु । महत्ता । अदती । अक्रुञ्चेत् किम् ? क्रुञ्चः । सुकन्भ्याम् ॥३९॥

१९५) पुंसोऽन्शब्दलोपः ॥४०॥

पुंसोऽन्शब्दस्य लोपः स्यात्, अघुटस्वरव्यञ्जनयोः । पुंसः । पुम्भ्याम् ॥४०॥

१९६) चतुरो वाशब्दस्योत्वम् ॥४१॥

चतुरो वाशब्दस्याघुट्स्वरव्यञ्जनयोरुत्वं स्यात् । चतुरः । चतुर्थः ॥४१॥

१९७) अनडुहश्च ॥४२॥

अनडुहो वाशब्दस्याघुट्स्वरव्यञ्जनयोरुत्वं स्यात् । अनडुही । अनडुद्भ्याम् ॥४२॥

१९८) सौ नुः ॥४३॥

अनडुहः सौ परे नुः स्यात् । अनड्वान् ॥४३॥

१९९) सम्बुद्धावुभयोर्ह्रस्वः ॥४४॥

उभयोश्चतुरनडुहोः सम्बुद्धौ ह्रस्वः स्यात् । हे प्रियचत्वः । हे अनड्वन् ॥४४॥

२००) अदसः पदे मः ॥४५॥

अदसः सम्बधिनि पदे सति विभक्तौ दस्य मः स्यात् । अमुष्मात् । विभक्तौ किम् ? अदः पुत्रः ॥४५॥

२०१) अघुट्स्वरादौ सेट्कस्यापि वन्सेर्वशब्दस्योत्वम् ॥४६॥

अघुटस्वरादौ इटा सहितस्य, रहितस्यापि, वन्सेर्वशब्दस्योत्वं स्यात् । पेचुषः । पैचुष्यम् । विदुषी ॥४६॥

२०२) श्वयुवमघोनां च ॥४७॥

एषां वस्याघुट्स्वरादावुत्वं स्यात् । शुनः । शुनी । यूनी । मघोनी ॥४७॥

२०३) वाहेर्वाशब्दस्यौ ॥४८॥

वाहेर्वाशब्दस्याघुट्स्वरादौ औ स्यात् । प्रष्ठौहः । प्रष्ठौही ॥४८॥

२०४) अञ्चेरलोपः पूर्वस्य च दीर्घः ॥४९॥

अञ्चेरकारस्याघुट्स्वरादौ लोपः स्यात्, पूर्वस्य च दीर्घः । प्रतीची । प्रातीच्यम् ॥४९॥

२०५) तिर्यङ् तिरश्चिः ॥५०॥

तियश्चशब्दोऽघुट्स्वरादौ तिरश्चिः स्यात् । तिरश्चः । तिरश्ची ॥५०॥

२०६) उदङ् उदीचिः ॥५१॥

उदञ्च्शब्दोऽघुट्स्वरादौ उदीच् स्यात् । उदीची । औदीच्यम् ॥५१॥

२०७) पात् पदं समासान्तः ॥५२॥

समासान्तः पात् शब्दोऽघुटस्वरादौ पदमाप्नोति ॥ एकपदः । असमासान्तेऽपि । पदा ॥५२॥

२०८) अवमसंयोगादनोऽलोपोऽलुप्तवच्च पूर्वविधौ ॥५३॥

वमन्तसंयोगवर्जलिङ्गत् परस्यानोऽकारस्याघुट्स्वरादौ लोपः स्यात् । स च पूर्ववर्णस्य विधौ कर्तव्येऽलुप्तवत् स्यात् । राज्ञी । दध्ना । अवमेति किम् ? पर्वणा । चर्मणा ॥५३॥

२०९) ईङ्योर्वा ॥५४॥

ओकृते ईकारे ङौ च परे वमन्तसंयोगवर्जादनोऽकारस्य वा लोपः स्यात् । साम्नी । सामनी । राज्ञि । राजनि ॥५४॥

२१०) आ धातोरघुटस्वरे ॥५५॥

धातोराकारस्याघुट्स्वरे लोपः स्यात् । शङ्खध्मः । सोमपाः ॥५५॥

२११) ईदूतोरियुवौ स्वरे ॥५६॥

धातोरीदूतौ भक्तिस्वरे ईयुवौ स्याताम् । नियौ । भुवाम् ॥५६॥

२१२) सुधीः ॥५७॥

सुधीर्विभक्तिस्वरे इयं प्राप्नोति । सुधिया ॥५७॥

२१३) भूरवर्षाभूरपुनर्भूः ॥५८॥

भूर्वर्षाभूपुनर्भूवर्जो विभक्तिस्वरे उवं प्राप्नोति । भुवौ । मित्रभुवे । अवर्षेत्यादि किम् ? वर्षाभ्वौ । पुनर्भूः ॥५८।.

२१४) अनेकाक्षरयोस्त्वसंयोगाद् य्वौ ॥५९॥

अनेकाक्षर लिङ्गयोरीदूतोर्धातोरसंयोगात् परयोः सतोर्विभक्तिस्वरे य्वौ स्याताम् । ग्रामण्यौ । यवल्वः । अनेकाक्षरयोः किम् ? नियः । भुवः । असंयोगात् (किम् ?) यवक्रियौ । कटप्रुवौ ॥५९॥

२१५) भ्रूर्धातुवत् ॥६०॥

विभक्तिस्वरे भ्रूधातुवत् स्यात् । भ्रुवा ॥६०॥

२१६) स्त्री च ॥६१॥

विभक्तिस्वरे स्त्रीर्धातुवत् स्यात् । स्त्रियम् । अतिस्त्रियौ ॥६१॥

२१७) वाम्शसोः ॥६२॥

अम्शसोः परयोः स्त्रीर्वा धातुवत् स्यात् । स्त्रियम् । स्त्रीम् स्त्रियः । स्त्रीः ॥६२॥

२१८) भवतो वादेरुत्वं सम्बुद्धौ ॥६३॥
भवतो वादेरवयवस्य सम्बुद्धौ वा उत्वं स्यात् । हे भोः । हे भवन् ॥६३॥

२१९) अव्ययसर्वनाम्नः स्वरादन्त्यात् पूर्वोऽक् कः ॥६४॥
अव्ययानां सर्वनाम्नां चान्त्यात् स्वरात् पूर्वोऽक् वा स्यात् । कश्च बहुलम् । उच्चकैः । उच्चैः । युष्मकाभिः । युष्माभिः । त्यादेश्च । पचतकिः ।

अज्ञातकुत्सिते चैव संज्ञायामनुकम्पने । तद्युक्तनीता वल्पत्वे ह्रस्वे वाच्ये च कः स्मृतः ॥
वृक्षकः ॥६४॥

२२०) के प्रत्यये स्त्रीकृताकारपरे पूर्वोऽकार इकारम् ॥६५॥
स्त्रीकृताकारपरे के प्रत्यये पूर्वोऽकार इकारमाप्नोति । सर्विका । कारिका ॥६५॥

इति श्री मेरुतुङ्गसूरिविरचितायां (कातन्त्र)-बालावबोधवृत्तौ

(द्वितीयाध्याये नाम्नि चतुष्टये) द्वितीयः पादः ॥

अथ तृतीयः पादः ।

२२१) युष्मदस्मदोः पदं पदात् षष्ठीचतुर्थीद्वितीयासु वस्नसौ ॥१॥
षष्ठी चतुर्थीद्वितीयाबहुत्वसिद्धं युष्मदस्मदोः पदं पदात् परं क्रमेण वस्नसौ वाऽऽप्नोति । धर्मो युष्माकम् । धर्मो वः । धर्मोऽस्माकम् । धर्मो नः । देयं युष्मभ्यम् । देयं वः । देयमस्मभ्यम् । देयं नः । पातु युष्मान् । पातु वः । पात्वस्मात् । पातु नः ॥१॥

२२२) वाम्नौ द्वित्वे ॥२॥
षष्ठ्यादिद्वित्वसिद्धं युष्मदस्मत्पदं पदात् परं क्रमेण वाम्नौ वाऽऽप्नोति । धर्मो युवयोः । धर्मो वाम् । गौर्युवाभ्याम् । गौर्वाम् । गौरावाम् । गौर्नो ॥२॥

२२३) त्वन्मदोरेकत्वे ते मे त्वा मा तु द्वितीयायाम् ॥३॥
षष्ठीचतुर्थ्येकत्वसिद्धं त्वन्मदोः पदं पदात् परं क्रमेण ते मे वाऽऽप्नोति । द्वितीयायां त्वेकत्वे वः त्वा मा । गौस्तव । गौस्ते । गौर्मह्यम् । गौर्मे । गौस्त्वाम् । गौस्त्वा । गौर्माम् । गौर्मे ॥३॥

२२४) न पादादौ ॥४॥
पादस्यादौ युष्मदादेः पदं एतानादेशान् नाप्नोति ।

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं पापनाशनः ॥

२२५) चादियोगे च ॥५॥
चादिना योगे युष्मदादिपदमेतानादेशान् नाप्नोति । गौस्तव च । गौर्मम च । च अह वा ह एव आमन्त्र्ये पूर्वे । साधो त्वा पातु ॥५॥

२२६) एषां विभक्तावन्तलोपः ॥६॥

युष्मदादीनामन्तस्य विभक्तौ लोपः स्यात् । एकत्वे युष्मदस्मदोस्त्वद्मदी । युष्मान् । अतिमाभिः ॥६॥

२२७) युवावौ द्विवाचिषु ॥७॥

द्वित्वस्थयोर्युष्मदस्मदोर्विभक्तौ युवावौ स्याताम् । युवाम् । अत्यावाभिः । विभक्तौ किम् ? युष्मत्पुत्रः ॥७॥

२२८) अमौ चाम् ॥८॥

युष्मदादिभ्यः परोऽम् औश्चाम् स्यात् । त्वाम् । आवाम् ॥८॥

२२९) आन् शसः ॥९॥

युष्मदादिपरस्य शस आन् स्यात् । युष्मान् । अतिमान् ॥९॥

२३०) त्वमहं सौ सविभक्त्योः ॥१०॥

युष्मदस्मदोः सौ सविभक्तयोः त्वमहम् स्याताम् । त्वम् । अहम् । अतित्वम् । अत्यहम् ॥१०॥

२३१) यूयं वयं जसि ॥११॥

युष्मदस्मदोर्जसि सविभक्त्योर्यूयं वयं स्याताम् । यूयम् । अतिवयम् ॥११॥

२३२) तुभ्यं मह्यं ङयि ॥१२॥

युष्मदस्मदोर्ङयि सविभक्त्योस्तुभ्यंमह्यमौ स्याताम् । तुभ्यम् । अतिमह्यम् ॥१२॥

२३३) तव मम ङसि ॥१३॥

युष्मदस्मदोर्ङयि सविभक्त्योस्तवममौ स्याताम् । तव । अतिमम ॥१३॥

२३४) अत् पञ्चम्यद्वित्वे ॥१४॥

युष्मदादिपरा द्वित्ववर्जपञ्चमी अत् स्यात् । त्वत् । अस्मत् । अत्यावत् । अद्वित्वे किम् ? युवाभ्याम् ॥१५॥

२३५) भ्यसभ्यम् ॥१५॥

युष्मदादिपरश्चतुर्थी भ्यस् अभ्यम् स्यात् । युष्मभ्यम् । अति- युष्मभ्यम् । अस्मभ्यम् । अत्यस् मभ्यम् ॥१५॥

२३६) सामाकम् ॥१६॥

युष्मदस्मदादिपरः साम् आकम् स्यात् । युष्माकम् । अस्माकम् । साम् किम् ? अतित्वयाम् ॥१६॥

२३७) एत्वमस्थानिनि ॥१७॥

अस्थानिनि अनादेशिनि स्वरादौ स्यादावेषामन्तस्य एत्वं स्यात् । त्वया । आवयोः । अतित्वयि ॥१७॥

२३८) आत्वं व्यञ्जनादौ ॥१८॥

अनादेशिनि व्यञ्जनादौ एषामन्तस्यात्वं स्यात् । युवाभ्याम् । कुलाभ्याम् ॥१८॥

२३९) रैः ॥१९॥
रैशब्दो व्यञ्जनादौ स्यादावात्वमाप्नोति । राः । अतिराभ्यां कुलाभ्याम् ॥१९॥

२४०) अष्टनः सर्वासु ॥२०॥
अष्टनः सर्वविभक्तिषु आ वा स्यात् । प्रियाष्टाः । प्रियाष्टा । अष्टासु । अष्टसु ॥२०॥

२४१) औ तस्माज्जस्शसोः ॥२१॥
तस्मादष्टनः कृताकारात् परयोर्जस्शसोः औ स्यात् । अष्टौ (तिष्ठन्ति) । अष्टौ (पश्य) । तस्मात् किम् ? अष्ट ॥२१॥

२४२) अर्वन्नर्वन्तिरसावनञ् ॥२२॥
अनञ् अर्वन् सिवर्जप्रत्ययेऽर्वन्त् स्यात् । अर्वन्तौ । सौ, अर्वा । अनञ् किम् ? अनर्वाणौ । तद्धितयस्वरस्त्रीकारेषु । अर्वत्यम् । आर्वतम् । अर्वती ॥२२॥

२४३) सौ च मघवान् मघवा वा ॥२३॥
मघवन्शब्दः सौ शेषे च प्रत्यये वा मघवन्त् स्यात् । मघवा । मघवान् । मघोनी । मघवती ॥२३॥

२४४) जरसा जरस् स्वरे वा ॥२४॥
विभक्तिस्वरे जरा जरस् वा स्यात् । अतिजरसौ । अतिजरौ ॥२४॥

२४५) त्रिचतुरोः स्त्रियां तिसृ चतसृ विभक्तौ ॥२५॥
स्त्रीलिङ्गे वर्तमानयोस्त्रिचतुरोर्विभक्तौ तिसृचतस्रौ स्याताम् । तिसृभिः । सुतिस्रा । प्रियचतसृ ॥२५॥

२४६) तौ रं स्वरे ॥२६॥
तौ तिसृचतस्रौ विभक्तिस्वरे रं प्राप्नुतः । तिस्रः । चतस्रः ॥२६॥

२४७) न नामि दीर्घम् ॥२७॥
तौ सनावामि परे दीर्घं नृप्नुतः । ति सृणाम् । चतसृणाम् ॥२७॥

२४८) नृ वा ॥२८॥
नृः सनावामि परे दीर्घं वाऽऽप्नोति । नृणाम् । नॄणाम् ॥२८॥

२४९) त्यदादीनाम विभक्तौ ॥२९॥
त्यदादीनामन्तस्य विभक्तौ अकारः स्यात् । त्यौ । अप्राधान्यात् । अतितदौ ॥२९॥

२५०) किम् कः ॥३०॥
विभक्तौ किम् कः स्यात् । के ॥३०॥

२५१) दोऽद्वेर्मः ॥३१॥
त्यदादीनां दस्याद्वेर्विभक्तौ मः स्यात् । इमौ । अद्वेः किम् ? द्वौ ॥३१॥

२५२) सौ सः ॥३२॥

त्यदादीनां दस्य सौ परे सः स्यात् । असौ । असकौ ॥३२॥

२५३) तस्य च ॥३३॥

त्यदादीनां तस्य सौ परे सः स्यात् । स्यः । गौणत्वात् । प्रियत्यात् ॥३३॥

२५४) इदमियमयम् पुंसि ॥३४॥

इदम्शब्दः सौ परे स्त्रियामियम्, पुंसि चायं स्यात् । इयं स्त्री । अयं ना । नपुंसके, इदं कुलम् ॥३४॥

२५५) अद् व्यञ्जनेऽनक् ॥३५॥

अक्वर्ज इदं व्यञ्जनादौ स्यादावत् स्यात् । आभ्याम् । अनक् किम् ? (इमकैः स्यादौ किम् ?) इदं कुलम् ॥३५॥

२५६) टौसोरनः ॥३६॥

अग्वर्ज इदं टौसोः परयोरनः स्यात् । अनेन । अनयोः । अकि, इमकेन ॥३६॥

२५७) एतस्य चान्वादेशे द्वितीयायां चैनः ॥३७॥

एतस्य इदमश्च टौसोर्द्वितीयायां चान्वादेशे एनत् स्यात् । एतं गां नय । अथो एनं देहि । अनेन भूर्दता । अथो एनेनात्ता, इत्यादि ॥३७॥

२५८) तस्माद् भिस् भिर् ॥३८॥

तस्मात् कृताकारा दमः परो भिस् भिर् स्यात् । एभिः । अकि तु, इमकैः ॥३८॥

२५९) अदसश्च ॥३९॥

अग्वर्जादिदमः परो भिस् भिर् स्यात् । अमीभिः । अकि, अमुकैः ॥३९॥

२६०) सावौ सिलोपश्च ॥४०॥

अदसोऽन्तश्च सौ परे ओ स्यात्, सिलोपश्च । असौ । असकौ । गोणत्वाद् अन्यदा ॥४०॥

२६१) उत्वं मात् ॥४१॥

अदसो मात् परस्य वर्णमात्रस्य उवर्णः स्यात् । अमुष्मै । अमू ॥४१॥

२६२) एद बहुत्वे त्वी ॥४२॥

अदसो मात् परस्य बहुत्वे निष्पन्न एत ईत् स्यात् । अमी ॥४२॥

२६३) अपां भे दः ॥४३॥

अपां विभक्तिभे दः स्यात् । अद्भिः ॥४३॥

२६४) विरामव्यञ्जनादिष्वनडुन्नहिवन्सीनां च ॥४४॥

विरामव्यञ्जनादिषुचानड्वाहनहिवन्सीनामन्तस्य दः स्यात् । अनडुद्भ्याम् । उपानत् । विद्वत्ता । येन । अनडुद्भ्यम् ॥४४॥

२६५) स्रसिध्वसोश्च ॥४५॥

एतयोरन्तस्य विरामे व्यञ्जनादिषु च दः स्यात् । उखास्त्रत् । पर्णध्वद्भ्याम् ॥४५॥

२६६) हशषछान्तेजादीनां डः ॥४६॥

हशषछानांमिजादीनां चान्तस्य विरामव्यञ्जनादिषु डः स्यात् । मधुलिट् । विड्भ्याम् । षट् । शब्दप्राट् । देवेट् । यज्-सृज्-मृज्-राज्-भ्राज्-भ्रस्ज्-व्रश्च्-परिव्राजोऽष्टौ ॥४६॥

२६७) दादेर्हस्य गः ॥४७॥

लिङ्गस्य दादेर्हस्य विरामव्यञ्जनादिषु गः स्यात् । गोधुक् । गोधुक्त्वम् ॥४७॥

२६८) चवर्गदृगादीनां च ॥४८॥

चवर्गान्तानां दृश इत्यादीनां च विरामव्यञ्जनादौ गः स्यात् । वाक् । श्रीभाग्भ्याम् । दृक्त्वम् । दृश् दिश् शस् स्पृश् दघृष् उष्णिह् ऋत्विज् असृज् (एते दृगादयः) ॥४८॥

२६९) मुहादीनां वा ॥४९॥

एषां विरामव्यञ्जनादौ गो वा स्यात् । मुक् मुट् । मुक्षु । मुट्सु । मुह्-द्रुह्-ष्णुह्-ष्णिह्-नशः पञ्च । (एते मुहादयः) ॥४९॥

२७०) हचतुर्थान्तस्य धातोस्तृतीयादेरादिचतुर्थत्वमकृतवत् ॥५०॥

धातोर्हचतुर्थान्तस्य तृतीयादेरेकस्वरावयवस्य विरामव्यञ्जनादौ आदिचतुर्थत्वं स्यात्, तदकृतवत् । निघुट् । ज्ञानभुग्भ्याम् । गर्धप् । अकृतवत् किम् ? गोधुक् ॥५०॥

२७१) सजुषाशिषो रः ॥५१॥

एतयोरन्तस्य विरामव्यञ्जनादौ रः स्यात् । सजूः । आशीर्भ्याम् ॥५१॥

२७२) इरुरोरीरूरौ ॥५२॥

धातोः इरुरोर्विरामव्यञ्जनादौ यथासंख्यम् ईरूरौ स्याताम् । गीः । धूर्षु ॥५२॥

२७३) अह्नः सः ॥५३॥

अहन्शब्दान्तस्य विरामव्यञ्जनादौ सः स्यात् । हे दीर्घाहः । अहोभ्याम् ॥५३॥

२७४) संयोगान्तस्य लोपः ॥५४॥

संयोगान्तस्य विरामव्यञ्जनादौ लोपः स्यात् । विद्वान । पुंभ्याम् ॥५४॥

२७५) संयोगादेर्धुटः ॥५५॥

संयोगादेर्धुटो विरामव्यञ्जनादौ लोपः स्यात् । साधुतट् । साधुमग्भ्याम् । रात् सस्यैव । ऊर्क् ॥५५॥

२७६) लिङ्गन्तनकारस्य ॥५६॥

लिङ्गान्तनकारस्य विरामव्यञ्जनादौ लोपः स्यात् । सखा । राजभ्याम् ॥५६॥

२७७) न सम्बुद्धौ ॥५७॥

लिङ्गान्तनस्य सम्बुद्धौ लोपो न स्यात् । हे राजन् । क्लीबे वा । हे साम । हे सामन् ॥५७॥

२७८) **नसंयोगान्तावलुप्तवच्च पूर्वविधौ** ॥५८॥
नकारसंयोगान्तौ पूर्ववर्णस्य दीर्घादिविधौ कर्तव्ये लुप्तावलुप्तवत् स्याताम् । राजभ्याम् । विद्वान् ॥५९॥

२७९) **इसुस्दोषां घोषवति रः** ॥५९॥
इसुसन्तस्य दोस्शब्दस्य च घोषवति परे रः स्यात् । सर्पिर्भ्याम् । धनुर्भ्याम् । दोर्भ्याम् । घोषवति किम् ? दोस्सु ॥५९॥

२८०) **धुटां तृतीयः** ॥६०॥
सामान्यघोषवति धुटां तृतीयः स्यात् । तडिद्भिः । मज्जति ॥६०॥

२८१) **अघोषे प्रथमः** ॥६१॥
अघोषे धुटां प्रथमः स्यात् । षट्सु । इच्छति ॥६१॥

२८२) **वा विरामे** ॥६२॥
विरामे धुटां प्रथमस्तृतीयो वा स्यात् । वाक् । वाग् ॥६२॥

२८३) **रेफसोर्विसर्जनीयः** ॥६३॥
रेफसकारयोः पदान्ते विसर्गः स्यात् । गीः । पयः- सु । वाधिकारान्न स्यादिस्वरे । गिरा । गिरादिभ्यः । धूर्ष ॥६३॥

२८४) **विरामव्यञ्जनादावुक्तं नपुंसकात् स्यमोर्लोपेऽपि** ॥६४॥
विरामे व्यञ्जनादौ च यदुक्तं कार्यं नपुंसकात् परयोः स्यमोर्लोपेऽपि तत् स्यात् । सुवाक् । सुपथि । सुद्यु । सुचतुः । न च । इदम् ॥६४॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्रः) बालावबोधवृत्तौ

(द्वितीयाध्याये नाम्नि चतुष्टये) तृतीयः पादः ॥

(। अथ चतुर्थः पादः।)

२८५) **अव्ययीभावादकारान्ताद् विभक्तीनाम् अमपञ्चम्याः** ॥१॥
अकारान्ताद् अव्ययीभावसमासात् पञ्चमीवर्जविभक्तीनाम् अम् स्यात् । उपकुलम् । पञ्चम्याः, उपकुम्भात् । गौणत्वात्, प्रियोपकुम्भम् ॥१॥

२८६) **वा तृतीयासप्तम्योः** ॥२॥
अकारान्तादव्ययीभावात् परयोः तृतीयासप्तम्योरम् वा स्यात् । पारेगङ्गम् । पारेगङ्गेन । मध्येवनम् । मध्येवने ॥२॥

२८७) **अन्यस्माल्लुक्** ॥३॥
अकारान्ताद् योऽन्योऽव्ययीभावस्तस्माद् विभक्तीनां लुक् स्यात् । उपनदि । अधित्वत् ॥३॥

२८८) **अव्ययाच्च** ॥४॥

अव्ययाद् विभक्तीनां लुक् स्यात् । स्वः । नीचैः ।।४।।

२८९) रूढाणां बहुत्वेऽस्त्रियाम् पत्यप्रत्ययस्य ।।५।।

देशतुल्यनाम्नां क्षत्रियाणां रुढसंज्ञा । तेषां रुढाणां बहुत्वेऽस्त्रियां कृतस्यापत्ययस्य लुक् स्यात् । अङ्गस्यापत्यानि, अङ्गाः । बहुत्वे किम् ? आङ्गः । अस्त्रियां किम् ? आङ्ग्यः ।।५।।

२९०) गर्गयस्कविदादीनां च ।।६।।

गर्गादियस्कादिविदादीनां बहुत्वेऽस्त्रियां कृतस्यापत्यप्रत्ययस्य लुक् स्यात् । गर्गाः । ण्यलुक् । यस्काः । विदाः । अणः । (लुक्) ।।६।।

२९१) भृग्वत्र्यङ्गिरसकुत्सवसिष्ठगोतमेभ्यश्च ।।७।।

एभ्यो बहुत्वेऽस्त्रियां कृतस्यापत्यप्रत्ययस्य लुक् स्यात् । अत्रेः एयण् । अन्यत्राण् । भृगवः । अत्रयः । अङ्गिरसः । कुत्साः । वसिष्ठाः । गोतमाः ।।७।।

२९२) यतोऽपैति भयमादत्ते वा तदपादानम् ।।८।।

यस्मादपैति, यस्माद् भयं, यस्मादादत्ते वा तत् कारकमपादानं स्यात् । ग्रामाद् गौर्याति । अग्नेर्बिभेति । गुरोरधीते । विश्लेषो विधिरपादानम् इत्यर्थः ।।८।।

२९३) ईप्सितं च रक्षार्थानाम् ।।९।।

रक्षार्थधातूनां प्रयोगे ईप्सितम निप्सितं चापादानं स्यात् । यवेभ्यो गां रक्षति । अहिभ्यः स्वं पाति ।।९।।

२९४) यस्मै दित्सा रोचते धारयते वा तत् सम्प्रदानम् ।।१०।।

यस्मै दातुमिच्छा, यस्मै रोचते, यस्मै धारयते वा तत् सम्प्रदानं स्यात् । विप्राय गां दत्ते । तुभ्यं रोचते दधि । मह्यं गां धारयति । दिग्मात्रमिदम् ।।१०।।

२९५) य आधारस्तदधिकरणम् ।।११।।

कर्तुः कर्मणो वाऽऽधारोऽधिकरणं स्यात् । कटे आस्ते काकः । खेऽर्कं पश्यति ।।११।।

२९६) येन क्रियते तत् करणम् ।।१२।।

क्रिया येन क्रियते तत् करणं स्यात् । दात्रेण लुनाति ।।१२।।

२९७) यत् क्रियते तत् कर्म ।।१३।।

कर्त्रा यत् क्रियते तत् कर्म स्यात् । कटं करोति । शिष्यं धर्ममनुशास्ति ।।१३।।

२९८) यः करोति स कर्ता ।।१४।।

यः क्रियां करोति स कर्ता स्यात् । मैत्रेण कृतः ।।१४।।

२९९) कारयति यः स हेतुश्च ।।१५।।

तमेव कर्तारं यः कारयति स हेतुकर्ता स्यात् । मैत्रः कारयति ।।१५।।

३००) तेषां परमुभयप्राप्तौ ।।१६।।

तेषां षण्णां कारकाणामुभयप्राप्तौ सत्यां यत् परं तत् स्यात् । ग्रामाय (धनं) दत्वा तीर्थं गतः । सम्प्रदानमेव । वृक्षं त्यजति खगः । कर्मैव ।।१६।।

३०१) प्रथमा विभक्तिर्लिङ्गर्थवचने ।।१७।।

लिङ्गार्थवचने प्रथमा विभक्तिः स्यात् । उच्चैः । वृक्षः । द्वौ ।।१७।।

३०२) आमन्त्रणे च ।।१८।।

आमन्त्रणेऽर्थे प्रथमा विभक्तिः स्यात् । हे पुत्र ।।१८।।

३०३) शेषाः कर्मकरणसम्प्रदानापादानस्वाम्याद्यधिकरणेषु ।।१९।।

शेषा द्वितीयाद्या षट् विभक्तयः कर्मादिषु षट्स्वर्थेषु, क्रमेण स्युः । कर्मणि द्वितीया । करणे तृतीया । सम्प्रदाने चतुर्थी । अपादाने पञ्चमी । सम्बन्धे षष्ठी । अधिकरणे सप्तमी ।।१९।।

३०४) पर्यपाङ्योगे पञ्चमी ।।२०।।

परि-अप-आङ् योगे पञ्चमी स्यात् । अपपरी वर्जने । परि ग्रामद् वृष्टो मेघः । अप ग्राम्राद् वृष्टो मेघः । आङ् मर्यादाभिविध्योः । आ देशाद् वृष्टो मेघः ।।२०।।

३०५) दिगितरर्तेऽन्यैश्च ।।२१।।

एभिर्योगे लिङ्गात् पञ्चमी स्यात् । पूर्वो ग्रामात् । इतरो मित्रात् । ऋते वनात् । अन्यो देवात् ।।२१।।

३०६) द्वितीयैनेन ।।२२।।

एनप्रत्ययान्तेन योगे लिङ्गात् द्वितीया स्यात् । दक्षिणेन ग्रामम् । निकषासमयाहाधिगन्तरा-न्तरेण येनतेनैः । निकषा ग्रामम् । इत्यादि ।।२२।।

३०७) कर्मप्रवचनीयैश्च ।।२३।।

कर्मप्रवचनीयैरभिपरिप्रतिअनु उपयोगे लिङ्गाद् द्वितीया स्यात् । वृक्षमभि याति गौः । यदत्र मां परि स्यात् । यदत्र मां प्रति स्यात् । अन्वर्जुनं योद्धा । उपार्हतं ध्येयः ।।२३।।

३०८) गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि ।।२४।।

चेष्टाक्रियाणां गत्यर्थानामध्ववर्जे कर्मणि द्वितीयाचतुर्थ्यौ स्याताम् । ग्रामं गच्छति । ग्रामाय याति । चेष्टायां किम् ? मनसा मेरुं याति । अनध्वनि किम् ? अध्वानं याति ।।२४।।

३०९) मन्यकर्मणि चानादरेऽप्राणिनि ।।२५।।

मन्यतेः प्राणिवर्जे कर्मण्यनादरे गम्ये द्वितीयाचतुर्थ्यौ स्याताम् । न त्वां तृणं मन्ये । न त्वां तृणाय मन्ये । अप्राणिनीति किम् ? नावादेः प्राणिसंज्ञा । न त्वा नावं, काकं, वा मन्ये ।।२५।।

३१०) नमः स्वस्तिस्वाहास्वधालंवषड्योगे चतुर्थी ।।२६।।

एभिर्योगे लिङ्गाच्चतुर्थी स्यात् । नमोऽर्हदभ्यः । स्वस्ति तुभ्यम् । स्वाहाऽग्नये । स्वधा पितृभ्यः । अलं समर्थो मल्लो मल्लाय । वषडिन्द्राय ।।२६।।

३११) तादर्थ्ये ।।२७।।

तस्मै इदमिति द्योत्ये लिङ्गाच्चतुर्थी स्यात् । यूपाय दारु । मूत्राय सम्पद्यते यवागूः ॥२७॥

३१२) तुमर्थाच्च भाववाचिनः ॥२८॥

तुमा समानार्थात् भाववाचिप्रत्ययान्ताल्लिङ्गात् चतुर्थी स्यात् । पाकाय, पक्तये, पचनाय वा, याति ॥२८॥

३१३) तृतीया सहयोगे ॥२९॥

सहार्थेन योगे लिङ्गात् तृतीया स्यात् । त्वया सह । मया साकम् ॥२९॥

३१४) हेत्वर्थे ॥३०॥

हेत्वर्थे वर्तमानाल्लिङ्गात् तृतीया स्यात् । धनेन कुलम् । अन्नेन वसति ॥३०॥

३१५) कुत्सितेऽङ्गे ॥३१॥

तुत्सिताङ्गे वर्तमानाल्लिङ्गात् तृतीया स्यात् । अक्ष्णा काणः । पादेन खञ्जः ॥३१॥

३१६) विशेषणे ॥३२॥

विशेषणे वर्तमानाल्लिङ्गात् तृतीया स्यात् । जटाभिस्तापसमपश्यत् ॥३२॥

३१७) कर्तरि च ॥३३॥

कर्तृकारके वर्तमानाल्लिङ्गात् तृतीया स्यात् । मया कृतम् ॥३३॥

३१८) कालभावयोः सप्तमी ॥३४॥

कालभावयो र्वर्तमानाल्लिङ्गात् सप्तमी स्यात् । शरदि धवलो मेघः । गोषु दुह्यमानासु गतः ॥३४॥

३१९) स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैः षष्ठी च ॥३५॥

एभिर्योगे लिङ्गात् षष्ठी सप्तमी च स्यात् । गवां स्वामी । गोषु स्वामी । इत्यादि ॥३५॥

३२०) निर्धारणे च ॥३६॥

निर्धारणेऽर्थे वर्तमानाल्लिङ्गात् षष्ठीसप्तम्यौ स्याताम् । नृणां क्षत्रियः शूरः । नृषु क्षत्रियः शूरः ॥३६॥

३२१) षष्ठी हेतुप्रयोगे ॥३७॥

हेतुप्रयोगे लिङ्गात् षष्ठी स्यात् । अन्नस्य हेतोर्वसति ॥३७॥

३२२) स्मृत्यर्थकर्मणि ॥३८॥

स्मरणार्थधातुप्रयोगे कर्मणि षष्ठी वा स्यात् । मातुः स्मरति । मातरं स्मरति ॥३८॥

३२३) करोतेः प्रतियन्ते ॥३९॥

सतो गुणान्तराधानं प्रतियत्नः । करोतेः कर्मणि प्रतियत्ने गम्ये षष्ठी वा स्यात् । उदकस्य, उदकं वा, उपस्कुरुते ।

३२४) हिंसार्थानामज्वरेः ॥४०॥

हिंसार्थधातूनां ज्वरवर्जानां कर्मणि षष्ठी वा स्यात् । चौरस्य, चौरं वा रुजति । दास्याः, दासीं वा आमयते । अज्वरेः किम् ? चौरं ज्वरयति ॥४०॥

३२५) कर्तृकर्मणोः कृति नित्यम् ॥४१॥

कृत्प्रयोगे कर्तृकर्मणोर्नित्यं षष्ठी स्यात् । तवासिका । अपां स्रष्टा । कृत्येव । तव, त्वया वा, ध्येयो जिनः । नोभयोर्हेतौ । नेतव्या ग्राममजा त्वया ॥४१॥

३२६) न निष्ठादिषु ॥४२॥

निष्ठादिषु प्रयोगे कर्तृकर्मणोः षष्ठी नित्यं न स्यात् । मया कृतमोदनं भुक्तवान् । शन्तृङ्-आनश्-क्वसु-कान्-कि-उकञ्-तृन्-उदन्त-णकच्-अव्ययखलर्था निष्ठार्थाः ॥४२॥

३२७) षडो णो ने ॥४३॥

विभक्तिने परे षडो णः स्यात् । षण्माम् ॥४३॥

३२८) मनोरनुस्वारो धुटि ॥४४॥

धुटि परेऽनन्त्ययोर्मनोरनुस्वारः स्यात् । पुंसः । दंशः । अनन्त्ययोः किम् ? नृन् । गच्छति ॥४४॥

३२९) वर्गे वर्गान्तः ॥४५॥

अनन्त्योरनुस्वारो वर्गे परे तस्य वर्गस्यान्तः स्यात् । शङ्किता । स्वाम्पि ॥४५॥

३३०) तवर्गश्चटवर्गयोगे चटवर्गौ ॥४६॥

अनन्त्यस्तवर्गश्चवर्गटवर्गयोर्योगे चवर्गटवर्गौ स्याताम् । आन्तरतम्यात् । मज्जति । षण्णाम् । अड्डति ॥४६॥

३३१) नामिकरपरप्रत्ययविकारागमस्थः सि षं नुविसर्जनीयषान्तरोऽपि ॥४७॥

नामिभ्यः कराभ्यां च परः प्रत्ययविकारागमस्थोऽनन्त्यः सिर्नुविसर्जनीयषान्तरोऽप्यन्नन्तरोऽपि षत्वमाप्नोति । अग्निषु । वाक्षु । विकारस्थः, एषः । आगमस्थः, सर्वेषाम् । नुविसर्जनीयषान्तरः, धनूंषि । सुपीःषु । सर्पिष्षु ॥४७॥

३३२) रषृवर्णेभ्यो: नो णमन्त्यः स्वरहयवकवर्गपवर्गान्तरोऽपि ॥४८॥

रेफषकार ऋवर्णेभ्यः परोऽनन्त्यनकारः स्वरहयकवर्गपवर्गान्तरोऽपि णत्वमाप्नोति । तीर्णम् । पूष्णम् । नृणाम् । नृणाम् । स्वराद्यनन्तरः । नरेण । आर्येण । अर्हेण । पर्वणा । अर्केण । मूर्खेण । दर्पेण । रेफेण । अनन्त्यः किम् ? वृक्षान् ॥४८॥

३३३) स्त्रियामादाः ॥४९॥

स्त्रियां वर्तमानादकारान्तलिङ्गाद् आप्रत्ययः स्यात् । अजा ॥४९॥

३३४) नद्याद्यञ्चवाहव्यन्स्यन्तृसखिनान्तेभ्य ईः ॥५०॥

नदादि-अञ्च-वाह-उ-इ-अन्सि-अन्त-ऋ-सखि नान्तेभ्यो लिङ्गेभ्य ईः स्यात् । नदी, मही अञ्च, प्राची । वाह्, प्रष्ठौही । उ, पट्वी । इ, दाक्षी । अन्स्, विदुषी । अन्त्, पचन्ती ।

ऋ, कर्त्री । सखि । सखी । नान्ते दण्डिनी । राज्ञी । इतोक्तेर्वा । धूलिः । धूली ॥५०॥

३३५) ईकारे स्त्रीकृतेऽलोप्यः ॥५१॥

स्त्रीकृते ईकारे अकारो लोप्यः स्यात् । नदी ॥५१॥

३३६) स्वरो ह्रस्वो नपुंसके ॥५२॥

नपुंसके वर्तमानः स्वरो ह्रस्वः स्यात् । सोमपम् । सेनानि । यवलु । अतिरि । प्रियक्च । अतिनु कुलम् । गौरप्रधानस्यान्तस्य स्त्रियामादादीनां चेति ह्रस्वः । चित्रगुः । अश्रद्धः । निष्कौशाम्बिः । अतिकरभोरुः ॥५२॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ (द्वितीयाध्याये नाम्नि चतुष्टये) चतुर्थः (कारक-) पादः ॥

(अथ पञ्चमः पादः ।)

३३७) नाम्नां समासो युक्तार्थः ॥१॥

नाम्नां युक्तोऽर्थः समासः स्यात् । ततोऽन्यद् वाक्यम् ॥१॥

३३८) तत्स्था लोप्या विभक्तयः ॥२॥

तत्स्था युक्तार्थमात्रस्था विभक्तयो लोप्याः स्युः । नीलोत्पलम् । क्वचिन्न । कण्ठेकालः ॥२॥

३३९) प्रकृतिश्च स्वरान्तस्य ॥३॥

स्वरान्तस्य लिङ्गस्य विभक्तिषु लुप्तासु प्रकृतिः स्यात् । गां गतः, गोगतः । सन्धिः स्यात् । देवेन्द्रः ॥३॥

३४०) व्यञ्जनान्तस्य यत्सुभोः ॥४॥

समासे व्यञ्जनान्तस्य लिङ्गस्य विभक्तिषु लुप्तासु सुभोरिति व्यञ्जने परे यदुक्तं कार्यं तत् स्यात् । विद्वद्गतिः । गोधुगाश्रयः ॥४॥

३४१) पदे तुल्याधिकरणे विज्ञेयः कर्मधारयः ॥५॥

यत्र समासे द्वे पदे विशेषण-विशेष्ये तुल्यविभक्तिके स्तः स कर्मधारयोः ज्ञेयः । नीलोत्पलम् । छिन्नप्ररुढः । दीर्घस्त्री । विशेषणं पूर्वं वाच्यम् । शस्त्रीव श्यामा शस्त्रीश्यामा । क्वचिदुपमानं परम् । पुरुषव्याघ्रः ॥५॥

३४२) संख्यापूर्वो द्विगुरिति ज्ञेयः ॥६॥

कर्मधारयः संख्यापूर्वो द्विगुरिति ज्ञेयः । पञ्चपूली ॥६॥

३४३) तत्पुरुषावुभौ ॥७॥

उभौ द्विगुकर्मधारयौ तत्पुरुषौ ज्ञेयौ । द्वयहः । महाराजः । तत्पुरुषत्वादत् ॥७॥

३४४) विभक्तयो द्वितीयाद्या नाम्ना परपदेन तु । समस्यन्ते समासो हि ज्ञेयस्तत्पुरुषः स च ॥८॥

यत्र समासे द्वितीयाद्या विभक्तयः परपदेन समस्यन्ते स तत्पुरुषो ज्ञेयः । सुखप्राप्तः । मासोनः । गोहितम् । मञ्चपतितः । राजपुरुषः । छायाशुष्कः । समत्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानगताद्यर्थे प्रथमादिभिः । समर्थः । अतिखट्वः । अवकोकिलं वनम् । पर्यध्ययनः । निष्कौशाम्बिः । तथा कुब्रह्म । अविप्रः । इत्यादयः ।।८।।

३४५) स्यातां यदि पदे द्वे तु यदि वा स्युर्बहून्यपि । तान्यन्यस्य पदस्यार्थे बहुव्रीहिः ।।९।।

यत्र समासे द्वे बहूनि वा पदान्यन्यपदस्यार्थे समस्यन्ते स बहुव्रीहिर्ज्ञेयः । आरूढवानरो वृक्षः । कृतकटः (जनः) । दत्तभोजनः (अतिथिः) । नष्टलोको देशः । चित्रगुः (देवदत्तः) । बहूदका (नदी) । बहुपदेऽपि । मत्तबहुगजं वनम् । तथा त्रिदशाः । आसन्नदशादयः । सपुत्रः ।।९।।

३४६) विदिक् तथा ।।१०।।

तथा विदिगभिधेये बहुव्रीहिः स्यात् । दक्षिणपूर्वा ।।१०।।

३४७) द्वन्द्वः समुच्चयो नाम्नोर्बहूनां वापि यो भवेत् ।।११।।

यत्र समासे द्वयोबहूनां वा नाम्नां समुच्चयः स द्वन्द्वः स्यात् । चैत्रमैत्रौ । धवाम्रपलाशाः । इतरेतरोऽयम् । वाक्त्वचम् । पीठच्छत्रोपानहम् । समाहारः ।।११।।

३४८) अल्पस्वरतरं तत्र पूर्वम् ।।१२।।

तत्र द्वन्द्वे यदल्पस्वरतरं तत् पूर्वं स्यात् । प्लक्षन्यग्रोधम् । लघ्वक्षरम् असखि इदन्तम् उदन्तं स्वराद्यकारान्तं वा । शिरः । शीर्षम् । अग्निषोमौ । असखि किम् ? सुतासखायौ । वायुतोयम् । अस्त्रशस्त्रम् । क्वचिन्न । तण्डुलकिण्वे । तरोक्तेर्द्विपदनियमः । शङ्खदुन्दुभिवीणाः ।।१२।।

३४९) यच्चार्चितं द्वयोः ।।१३।।

द्वन्द्वे यत् पूज्यं तत् पूर्वं स्यात् । देवदैत्यौ । क्वचिन्न । काकमयूरौ ।।१३।।

३५०) पूर्वं वाच्यं भवेद्यस्य सोऽव्ययीभाव इष्यते ।।१४।।

यस्य समासस्य वाच्यपूर्वं स्यात् सोऽव्ययीभावः । अधित्वत् । उपकुम्भम् । मध्येवनम् । तथा केशाकेशि, मुष्टामुष्टि । इत्यादि ।।१४।।

३५१) स नपुंसकलिङ्ग स्यात् ।।१५।।

सोऽव्ययीभावो नपुंसकलिङ्गं स्यात् । पारेगङ्गम् ।।१५।।

३५२) द्वन्द्वैकत्वम् ।।१६।।

द्वन्द्वस्यैकत्वं नपुंसकं स्यात् । हस्त्यश्वम् । आराशस्त्रि ।।१६।।

३५३) तथा द्विगोः ।।१७।।

द्विगोरेकत्वं नपुंसकं स्यात् । चतुष्पथम् । अपात्राद्यन्तादीनां नदादित्वात्, पञ्चपूली ।।१७।।

३५४) पुंवद्भाषितपुंस्कानूङ्पूरण्यादिषु स्त्रियां तुल्याधिकरणे ॥१८॥

स्त्रियां वर्तमानो भाषितपुंस्कविशेषणरुप ऊङन्तवर्जः शब्दः स्त्रियामेकार्थे पूरण्यादिवर्जे पदे परे पुंवत् स्यात् । दीर्घशालः । शोभनभार्यः । गौरजङ्घः । भाषितपुंस्कः किम् ? द्रोणीभार्यः । अनूङ् किम् ? करभोरूभार्यः । अपूरण्यादिषु किम् ? कल्याणीपञ्चमा रात्रयः । कल्याणीप्रियः ॥१८॥

३५५) संज्ञापूरणीकोपधास्तु न ॥१९॥

संज्ञापूरणीकोपधाः पुंवन्न स्युः । दत्ताभार्यः । पञ्चमीभार्यः । पाचिकाभार्यः ॥१९॥

३५६) कर्मधारयसंज्ञे तु पुंवद्भावो विधीयते ॥२०॥

स्पष्टम् । पूर्वप्रतिषेधबाधकोऽयम् । दत्तभार्या । पञ्चमभार्या । पाचिकभार्या ॥२०॥

३५७) आकारो महतः कार्यस्तुल्याधिकरणे पदे ॥२१॥

महतस्तुल्याधिकरणे पदे परे आकारः कार्यः । महादेवः । च्व्यन्तस्य न । महद्भूतः शशी ॥२१॥

३५८) नस्य तत्पुरुषे लोप्यः ॥२२॥

व्याख्यातो विशेषः । नञ् सम्बधिनि समासे नो लोप्यः स्यात् । असवर्णः । अघोषः । अकाकम् ॥२२॥

३५९) स्वरेऽक्षरविपर्ययः ॥२३॥

नञ्समासे स्वरेऽक्षरविपर्ययः स्यात् । अनजम् । अनजा भूः ॥२३॥

३६०) कोः कत् ॥२४॥

कुशब्दस्य तत्पुरुषे स्वरे कत् स्यात् । कदश्वः । तत्पुरुषे किम् ? कूष्ट्रो देश१ ॥२४॥

३६१) का त्वीषदर्थेऽक्षे ॥२५॥

ईषदर्थे वर्तमानस्य कोस्तत्पुरुषे का स्याद्, अक्षशब्दे च परे । कालवणम् । काक्षम् । कापथं च ॥२५॥

३६२) पुरुषे तु विभाषया ॥२६॥

तत्पुरुषे कुशब्दस्य पुरुषे परे का वा स्यात् । कापुरुषः । कुपुरुषः । अल्पे, कोष्णम् । कवोष्णम् । कदुष्णं च ॥२६॥

३६३) याकारौ स्त्रीकृतौ ह्रस्वौ क्वचित् ॥२७॥

ईश्च आश्च स्त्रीकृतौ समासे क्वचिद् ह्रस्वौ स्याताम् । रेवतिमित्रः । मालभारिणी स्त्री । इष्टिकचितम् ॥२७॥

३६४) ह्रस्वस्य दीर्घता ॥२८॥

समासे ह्रस्वस्य क्वचिद् दीर्घः स्यात् । दात्राकर्शः । विश्वामित्रः । प्रावृट् ॥२८॥

३६५) अनव्ययविसृष्टस्तु सकारं कपवर्गयोः ॥२९॥

अव्ययवर्जस्य विसर्गः कपयोः खफयोश्च सकारमाप्नोति । अयस्कल्पम् । अयस्काम्यति । पयस्कुम्भः । पयस्पात्रम् । भास्करः । अव्ययस्यापि । पुरस्कर्तुम् । नमस्कर्तुम् । पुरस्खादः । पुरस्फक्वः । नामिभ्यस्तु षम् । दुष्कृतम् । चतुष्पथम् । धनुष्खण्डम् । सर्पिष्फेनम् ।।२९।।

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ (द्वितीयाध्याये नाम्नि चतुष्टये) पञ्चमः (समास-) पादः ।

(अथ षष्ठः पादः १)

३६६) वाणपत्ये ।।१।।

षष्ठ्यन्तनाम्नोऽपत्येऽर्थे वा अण् प्रत्ययः स्यात् । पाण्डवः । पाण्डोरपत्यं वा ।।१।।

३६७) ण्य गर्गादेः ।।२।।

गर्गादेर्गणात् पौत्रादावपत्येऽर्थे ण्यः स्यात् । गर्गस्यापत्यं वृद्धं गार्ग्यम् । वात्स्यः । पौत्रादौ किम् ? गार्गिः । अनन्तरोऽपि । पाराशर्यः ।।२।।

३६८) कुञ्आदेरायनण् स्मृतः ।।३।।

कुञ्आदेर्गणात् पौत्रादावपत्येऽर्थे आयनण् स्यात् । तदन्तात् ण्यश्चाबहुत्वेऽस्त्रियाम् । कौञ्आयन्यः । कौञ्आयन्यौ । बहुत्वे । कौञ्आयनाः । स्त्रियाम् । कौञ्आयनी । नडादेरायनणेव । नाडायनः ।।३।।

३६९) स्त्र्यत्र्यादेरेयण् ।।४।।

स्त्रीविहिता आईउदिभ्योऽत्रितुल्यद्विस्वरेदन्तादिभ्यश्चार्थे एयण् स्यात् । शैवेयः । सौपर्णेयः । कामण्डलेयः । यौवतेयः । आत्रेयः । नाभेयः । शौभ्रेयः । द्विस्वरेति किम् ? मारीचः । इदन्तेति किम् ? दाक्षायणः ।।४।।

३७०) इणतः ।।५।।

अकारान्तान्नाम्नोऽपत्येऽर्थे इण् स्यात् । दाक्षिः ।इ। दाशरथिः । तदस्येदमण् ।।५।।

३७१) बाह्वादेश्च विधीयते ।।६।।

बाह्वादेर्गणाद् अपत्येऽर्थे इण् स्यात् । बाहविः ।।६।।

३७२) रागान्नक्षत्रयोगाच्च समूहात् सास्य देवता । तद् वेत्त्यधीते तस्येदमेवमादेरण् इष्यते ।।७।।

रागात् । कौसुम्भम् । नक्षत्रयोगात् । पौषमहः । समूहात् । यौवतम् । सास्य देवता । जैनः । तद् वेति । छान्दसः । वैयाकरणः । तस्येदम् । मार्गं मांसम् । एवमादेः । आश्वो रथः । इत्यादि ।।७।।

३७३) तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि । पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि ।।८।।

तेनेति तृतीयान्तान्नाम्नो दीव्यत्याद्यर्थे पण्यादिभ्यश्च पर इकण् स्यात् । आक्षिकम् । दाधिकम् । भाण्डम् । गौपुच्छिकः । शाकटिकः । पाणविकः । दौवारिकः । साहस्रिकः ।

आदिशब्दात् कौद्दालिकादयः ॥८॥

३७४) नावस्तार्ये विषाद् वध्ये तुलया संमितेऽपि च । तत्र साधौ यः ॥९॥

तृतीयान्तान्नाम्नो नावस्तार्येऽर्थे, विषाद्वध्येऽर्थे, तुलया संमितेऽर्थे, तत्रेति सप्तम्यन्तात् साधावित्यर्थे यः स्यात् । नाव्यं जलम् । विष्यो वैरी । तुल्यम् । कर्मण्यम् ॥९॥

३७५) ईयस्तु हिते ॥१०॥

हितेऽर्थे ईयः स्यात् । वत्सीयः (गोधुक्) । त्यदादेः स्वराणामादावाकारवृद्धिमतां च शेषेऽर्थे । त्यदीयः । शालायां भवो जातो वा शालीयः । औपगवीयाः छात्राः ॥१०॥

३७६) यदुगवादितः ॥११॥

उवर्णान्ताद् गवादिभ्यश्च हितेऽर्थे यत् स्यात् । कृकवाकव्यं पयः । वधव्यो देशः । गव्यं धनम् । हविष्यास्तण्डुलाः ॥११॥

३७७) उपमाने वतिः ॥१२॥

उपमानेऽर्थे वत् स्यात् । राजेव राजवत् । देवमिव देववत् । त्वयेव त्वद्वत् । विप्रायेव विप्रवत् । ग्रामादिव ग्रामवत् । तस्येव तदवत् । मथुरायामिव मथुरावत् ॥१२॥

३७८) तत्वौ भावे ॥१३॥

भावेऽभिधेये तत्वौ स्याताम् । गोता । गोत्वम् । पृथ्वादेरिमन् वा । प्रथिमा । पृथुता । पृथुत्वम् ॥१३॥

३७९) यण् च प्रकीर्तितः ॥१४॥

भावेऽर्थे यण् च स्यात् । जाड्यम् ॥१४॥

३८०) तदस्यास्तीति मन्त्वन्त्वीन् ॥१५॥

तदिति प्रथमान्तात् तदस्यास्तीत्यर्थे मन्त्, वन्त्, विन् इन् इति यथालक्ष्यं स्युः । गोमान् । लक्ष्मीवान् । तपस्वी । मायी ॥१५॥

३८१) संख्याया पूरणे डमौ ॥१६॥

संख्यायाः पूरणेऽर्थे डः स्यात् । असंख्यादीनां मश्च । एकादश । पञ्चमी ॥१६॥

३८२) द्वेस्तीयः ॥१७॥

द्वेः पूरणेऽर्थे तीयः स्यात् । द्वितीयः ॥१७॥

३८३) त्रेस्तृ च ॥१८॥

त्रेः पूरणेऽर्थे तीयः स्यात् । तृतीयः ॥१८॥

३८४) अन्तस्थो डे र्षोः ॥१९॥

संख्यारषोरन्ते डे परे थः स्यात् । चतुर्थः । षष्ठः ॥१९॥

३८५) कतिपयात् कतेः ॥२०॥

आभ्यां पूरणेऽर्थे थः स्यात् । कतिपयथः । कतिथः ॥२०॥

३८६) विंशत्यादेस्तमट् ॥२१॥

विंशत्यादेः पूरणेऽर्थे तमट् स्यात् । विंशतितमः । विंशः । त्रिंशत्तमः । त्रिंशः ॥२१॥

३८७) नित्यं शतादेः ॥२२॥

शतादेः पूरणेऽर्थे नित्यं तमट् स्यात् । शततमः । एकलक्षतमः ॥२२॥

३८८) षष्ट्याद्यतत्परात् ॥२३॥

असंख्यापरात् षष्ट्यादेः पूरणेऽर्थे नित्यं तमट् स्यात् । षष्टितमः । नवतितमः । अतत्परात् किम् ? एकषष्टः । एकषष्टितमः ॥२३॥

३८९) विभक्तिसंज्ञा विज्ञेया वक्ष्यन्तेऽतः । परं तु ये अद्वयादेः सर्वनाम्नस्ते बहोश्चैव पराः स्मृताः ॥२४॥

वक्ष्यमाणप्रत्ययाः सर्वनाम कार्यं प्रति विभक्तिसंज्ञा विज्ञेयाः । ते च प्रत्यया द्वयादिवर्जसर्वनाम्नोश्चैव पराः स्युः ॥२४॥

३९०) तत्रेदमिः ॥२५॥

तत्र विभक्तिसंज्ञेषु परेषु इदम इः स्यात् । इह । इदानीम् ॥२५॥

३९१) रथोरेतेत् ॥२६॥

रथोः परत इदमः क्रमेण एत इत् स्याताम् । एतर्हि । इत्थम् ॥२६॥

३९२) तेषु त्वेतदकारताम् ॥२७॥

तादिषु प्रत्ययेषु एतद् अकारतां प्राप्नोति । अतः । अत्र । तेषु किम् ? एतथा ॥२७॥

३९३) पञ्चम्यास्तस् ॥२८॥

पञ्चम्यन्ताद् अद्वयादिसर्वनामबहुभ्यस्तस् स्यात् । सर्वतः । यतः । बहुतः अहागृरुहोरवधौ । ग्रामतः । हागृरुहोः हागरुहोः । सार्थाद्धीनः । वृक्षादवरोहति ॥२८॥

३९४) त्रः सप्तम्याः ॥२९॥

सप्तम्यन्तात् पूर्वोक्तात् त्रः स्यात् । यत्र । बहुत्र । आद्यादिभ्यस्तस् । आदितः । अग्रतः ॥२९॥

३९५) इदमो हः ॥३०॥

सप्तम्यान्तेदमो हः स्यात् । इह ॥३०॥

३९६) किमः ॥३१॥

सप्तम्यन्तात् किमो हः स्यात् । कुह ॥३१॥

३९७) अत् क्व च ॥३२॥

सप्तम्यन्तात् किमोऽत् स्यात् । किमश्च क्व । क्व ॥३२॥

३९८) तहोः कुः ॥३३॥

तह्योः परयोः किमः कुः स्यात् । कुतः । कुह ॥३३॥

३९९) काले किंसर्वयदेकान्येभ्य एव दा ॥३४॥

एभ्यः काले सप्तम्यान्तेभ्यो दाः स्यात् । कदा । सर्वदा । यदा । एकदा । अन्यदा ॥३४॥

४००) इदमो र्ह्यधुना दानीम् ॥३५॥

इदमः कालेऽर्थे सप्तम्यन्ताद् र्हि-अधुनादानीमः स्युः । एतर्हि । अधुना । इदानीम् ॥३५॥

४०१) दादानीमौ तदः स्मृतौ ॥३६॥

तदः कालेऽर्थे सप्तम्यन्ताद् दादानीमौ स्मृतौ । तदा । तदानीम् ॥३६॥

४०२) सद्य आद्या निपात्यन्ते ॥३७॥

सद्यस् आद्याः शब्दाः कालेऽर्थे निपात्यन्ते । समानेऽहनि सद्यः । अस्मिन्नहनि अद्य । एवमन्येऽपि ॥३७॥

४०३) प्रकारवचने तु था ॥३८॥

सर्वनाम्नोऽद्वयादेः प्रकारोक्तौ था स्यात् । सर्वथा । यथा । तथा । संख्याया धा । एकधा । द्विधा । एवमन्येऽपि ॥३८॥

४०४) इदंकिम्भ्यां थमुः कार्यः ॥३९॥

इदम्-किम्भ्यां प्रकारोक्तौ थमुः कार्यः । इत्थम् । कथम् ॥३९॥

४०५) आख्याताच्च तमादयः ॥४०॥

आख्यातान्नाम्नश्च तमादयो निपात्यन्ते । द्विबहुषु प्रकृष्टे तरतमौ । आढयतरः । आढयतमः । किंत्याद्येकान्तराव्ययेभ्योऽसत्त्वे तरांतमाम् । अस्तितराम् । अस्तितमाम् । पूर्वाह्णेतराम् । पूर्वाह्णेतमाम् । उच्चैस्तराम् । उच्चैस्तमाम् । गुणाद् इष्ठेयन्सौ वा । पटिष्ठः । पटीयान् । पटुतरः । पटुतमः । त्यादेश्च प्रशस्ते रूपम् । पचतिरूपम् । वैयाकरणरुपः । ईषदसमाप्ते कल्पदेश्यदेशीयाः । पचतिकल्पम् । पटुदेश्यः । पटुदेशीयः । नाम्नो निन्द्ये पाशः । कविपाशः । भूतपूर्वे चरट् । आढयचरः । षष्ठया रूप्यश्च । चैत्ररूप्या गौः । चैत्रचरी भूः । बह्वल्पार्थात् कारकादिष्टानिष्टे शस् । भूरिशः । स्तोकशः । संख्यैकार्थाभ्यां वीप्सायाम् । द्विशः । कुडवशः । संख्याया वारे कृत्वसच् । पञ्चकृत्वः । द्वित्रिचतुर्भ्यः सुच् । द्विः, द्विकृत्वो वा भुङ्क्ते । विकारेऽवयवेऽभक्षाच्छादनयोर्वा मयट् । स्वर्णमयं पात्रम् । सौवर्णम् । अभक्षाच्छादनयोः किम् ? मौद्गः सूपः । कार्पासं वासः । अण् । एकस्वरान्नित्यं मयट् । मृन्मयम् । अभूततद्भावे कृभ्वस्तिषु च्विः । शुक्लीकरोति । नीलीभवति । नीलीस्यात् । मनोरुश्चक्षुश्चेतोरहोरजसां सलुक् च्वौ । उन्मनीकरोति । विचेतसीभवति । विरजीस्यात् । व्याप्तौ सात् सम्पद्यतौ च । कर्म भस्मसात्करोति भवतीत्यादि । स्वाम्यर्थाद् आयत्ते । राजसात्करोति । देवत्रा च । देवत्राकरोति । देवसात्स्यात् । प्रमाणान्मात्रट् । हस्तमात्रम् । एवमन्येऽपि ॥४०॥

४०६) समासान्तगतानां वा राजादीनामदन्तता ॥४१॥

समासस्यान्ते स्थितानां राजादीनाम् अप्रत्ययान्तता स्यात् । देवराजः । द्वयहः । अतिसखः । स्त्रीपुंसौ । अत्र राजादिगणः ॥४१॥

४०७) डानुबन्धेऽन्त्यस्वरादेर्लोपः ॥४२॥

डानुबन्धप्रत्ययेऽन्तस्वरादेर्लोपः स्यात् । पञ्चाशः ॥४२॥

४०८) तेर्विंशतेरपि ॥४३॥

विंशतेस्तेर्डानुबन्धलोपः स्यात् । एकोनविंशः ॥४३॥

४०९) इवर्णावर्णयोर्लोपः स्वरे प्रत्यये ये च ॥४४॥

इवर्णावर्णयोस्तद्धिते ये च परे लोपः स्यात् । आत्रेयः । नादेयः । दाक्षिः । गाङ्गेयः । तुल्यः । अव्ययानामन्त्यस्वरादेः । पौनःपुनिकः ॥४४॥

४१०) नस्तु क्वचित् ॥४५॥

क्वचिद् यथालक्ष्यं नस्य लोपः स्यात् । त्र्यहः क्वचिदुपधायाः । आह्निकम् ॥४५॥

४११) उवर्णस्त्वोत्वमापाद्यः ॥४६॥

उवर्णस्तद्धिते स्वरे ओत्वमापादनीयः । औपगवः । वधव्यः ॥४६॥

४१२) एयेऽकद्रवास्तु लुप्यते ॥४७॥

कद्रूवर्जस्यावर्णस्योवर्ण एये परे लुप्यते । कामण्डलेयः । अकद्रवाः किम् ? काद्रवेयाः । पाण्डवेयाः ॥४७॥

४१३) कार्याववावावादेशावौकारौकारयोरपि ॥४८॥

ओकारौकारयोस्तद्धिते स्वरे परे ये च परे अवआवौ कार्यौ । औपगवः । गव्यम् । नाव्यम् ॥४८॥

४१४) वृद्धिरादौ सणे ॥४९॥

णानुबन्धे तद्धितस्वराणामादौ स्वरस्य वृद्धिः स्यात् । आ आर् ऐ औ वृद्धयः । दाक्षिः । कार्पण्यम् । ऐन्द्रः । शौचम् । उत्तरपदस्यापि । पूर्ववार्षिकम् । उभयपदस्यापि । सौभाग्यम् । एवमादि ॥४९॥

४१५) न य्वोः पदाद्योर्वृद्धिरागमः ॥५०॥

इह निषेधो विधिश्च । णानुबन्धे तद्धिते पदसमीपयोर्यवयोः समीपस्वरस्य वृद्धिर्न स्यात् । किन्तु यवयोरादौ क्रमेणान्तरतम्यादौ वृद्धिरागमः स्यात् । वैयसनम् । सौवश्विः । य्वोः समीपे किम् ? दाध्यश्विः । माध्वश्विः । द्वारादीनां चापदाद्योरपि । दौवारिकः । सौवस्तिकः ॥५०॥

इति श्रीमेरुतुङ्गसूरि विरचितायां (कातन्त्र-) बालावबोधवृत्तौ (द्वितीयाध्याये नाम्नि चतुष्टये) षष्ठस्तद्धितपादः ॥ इति द्वितीयोऽध्यायः ॥

(अथ तृतीयोऽध्यायः आख्यातम् ।)

(अथ प्रथमः पादः)

४१६) अथ परस्मैपदानि ॥१॥

अथानन्तराणि दशविभक्तीनां पूर्वाणि नवनववचनानि परस्मैपदानि स्युः । ति तस् अन्ति । सि थस् थ । मि वस् मस् । एवं सर्वत्र ९० ॥१॥

४१७) नव पराण्यात्मने ॥२॥

दशविभक्तीनां पराणि नवनववचनानि आत्मनेपदानि स्युः । ते आते अन्ते । से आथे ध्वे । ए वहे महे । एवं सर्वत्र वचन ९० । उभयं १८० ॥२॥

४१८) त्रीणि त्रीणि प्रथममध्यमोत्तमाः ॥३॥

परस्मैपदानामात्मनेपदानां च त्रीणि त्रीणि वचनानि क्रमेण प्रथममध्यमोतमसंज्ञानि स्युः । ति तस् अन्ति, प्रथमः पुरुषः । सि थस् थ, मध्यमपुरुषः । मि वस् मस्, उत्तमपुरुषः । ते आते अन्ते, प्रथमः । से आते ध्वे, मध्यमः । ए वहे महे, उत्तमः । एवं सर्वत्र ॥३॥

४१९) युगपदवचने परः पुरुषाणाम् ॥४॥

युगपद् एककालं क्रियावचने पुरुषाणां मध्ये यः परः स स्यात् । स च त्वं चाहं च पचामः । स च त्वं चापाक्तम् । त्वं चाहं च पक्ष्यावः ॥४॥

४२०) नाम्नि प्रयुज्यमानेऽपि प्रथमः ॥५॥

नाम्नि प्रयुज्यमानेऽप्रयुज्यमानेऽपि प्रथमः पुरुषः स्यात् । स वक्ति । पचन्ते । पच्येते घटौ ॥५॥

४२१) युष्मदि मध्यमः ॥६॥

युष्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि मध्यमपुरुषः स्यात् । त्वं पचसि । पच ॥६॥

४२२) अस्मद्युतमः ॥७॥

अस्मदि प्रयुज्यमानेऽप्रयुज्यमानेऽपि उत्तमपुरुषः स्यात् । अहमस्मि । पचामः ॥७॥

४२३) अदाब् दाधौ दा ॥८॥

दाप्दैपवर्जौ दाधाधातू दासंज्ञौ स्तः । दीयते । धीयते । अदाप् किम् ? दीयतेऽन्नम् । निदायते स्थालम् ॥८॥

४२४) क्रियाभावे धातुः ॥९॥

क्रियाप्रतिपादको धातुः स्यात् । भवति ॥९॥

४२५) काले ॥१०॥

काले इति सप्तम्यन्तस्याधिकारो ज्ञेयः ॥१०॥

४२६) सम्प्रति वर्तमाना ॥११॥

सम्प्रतिकाले धातोर्वर्तमाना स्यात् । वदति । गम्यते ॥११॥

४२७) **स्मेनातीते ॥१२॥**

स्मेन योगेऽतीते काले वर्तमाना स्यात् । याति स्म कः । इति स्म स वक्ति ॥१२॥

४२८) **परोक्षा ॥१३॥**

अतीते काले परोक्षा स्यात् । आदिदेवः शिवं ययौ ॥१३॥

४२९) **भूतकरणवत्यश्च ॥१४॥**

भूतकरणवत्यो ह्यस्तन्यद्यतनीक्रियातिपत्तयोऽतीते स्युः । अभवत् । अभूत् । अभविष्यत् ॥१४॥

४३०) **भविष्यति भविष्यन्त्याशीःश्वस्तन्यः ॥१५॥**

भविष्यति काले एता विभक्तयः स्युः । वक्ष्यति । श्रीर्भूयात् । वक्ता ॥१५॥

४३१) **तासां स्वसंज्ञाभिः कालविशेषः ॥१६॥**

तासां विभक्तीनां स्वसंज्ञाभिः कालविशेषो ज्ञेयः । तेन वर्तमाने काले वर्तमाना । ह्यस्तने अतीते ह्यस्तनी । अद्यतने अतीते अद्यतनी । परोक्षेऽतीते परोक्षा । क्रियातिपतने अतीते क्रियातिपत्तिः । एधाश्चेदाप्स्यत् तदा ओदनमपक्ष्यत् । भविष्यति काले आशीर्युक्ते आशीः । श्वस्तने भविष्यति श्वस्तनी । दिग्मात्रमिदम् ॥१६॥

४३२) **प्रयोगतश्च ॥१७॥**

पदान्तरस्य प्रयोगात् कालविशेषो ज्ञेयः । यावद्भुङ्क्तेते ततो याति ।

४३३) **पञ्चम्यनुमतौ ॥१८॥**

अनुमतौ वर्तमानाद्धातोः पञ्चमी स्यात् । कटं कुरु ॥१८॥

४३४) **समर्थनाशिषोश्च ॥१९॥**

पराशङ्क्यार्थाध्यवसायः समर्थना । तस्यामाशिषि च धातोः पञ्चमी स्यात् । गिरिमुत्पाटयानि । जीव ॥१९॥

४३४) **विध्यादिषु सप्तमी च ॥२०॥**

एषु वर्तमानाद् धातोः सप्तमी पञ्चमी च स्यात् । क्षमां भजेः, भज वा ॥२०॥

४३६) **क्रियासमभिहारे सर्वकालेषु मध्यमैकवचनं पञ्चम्याः ॥२१॥**

पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः । तत्र वर्तमानाद् धातोः सर्वकालेषु पञ्चम्या मध्यमैकवचनं हि स्वौ स्तः । लुनीहि लुनीहीत्येवायं लुनाति । अलुनाः । लविष्यामो वा ॥२१॥

४३७) **मायोगेऽद्यतनी ॥२२॥**

मायोगे धातोरद्यतनी स्यात् । मा भूः । न माङा । मा वद ॥२२॥

४३८) **मास्मयोगे ह्यस्तनी च ॥२३॥**

मास्मयोगे ह्यस्तन्यद्यतनी च स्यात् । मा स्म करोः । माकार्षीः स्म ॥२३॥

४३९) **वर्तमाना ॥२४॥**

ति तस् अन्ति । सि थस् थ । मि वस् मस् । ते आते अन्ते । से आथे ध्वे । ए वहे महे । एतानि वचनानि वर्तमानाः स्युः ॥२४॥

४४०) सप्तमी ॥२५॥

यात् याताम् युस् । यास् यातम् यात । याम् याव याम ॥ ईत् ईयाताम् ईरन् । ईथास् ईयाथाम् ईध्वम् । ईय ईवहि ईमहि ॥ एतानि वचनानि सप्तमी स्युः ॥२५॥

४४१) पञ्चमी ॥२६॥

तु ताम् अन्तु । हि तम् त । आनि आव आम ॥ ताम् आताम् अन्ताम् । स्व आथाम् ध्वम् । ऐ आवहै आमहै । एतानि वचनानि पञ्चमी स्युः ॥२६॥

४४२) ह्यस्तनी ॥२७॥

दि ताम् अन् । सि तम् त । अम् व म ॥ त आताम् अन्त । थास् आथाम् ध्वम् । इ वहि महि । एतानि वचनानि ह्यस्तनी स्युः ॥२७॥

४४३) एवमेवाद्यतनी ॥२८॥

एवमेव ह्यस्तनीवद् अद्यतनी स्यात् ॥२८॥

४४४) परोक्षा ॥२९॥

अट् अतुस् उस् । थल् अथुस् अ । अट् व म ॥ ए आते इरे । से आथे ध्वे । ए वहे महे ॥ एतानि परोक्षा स्युः ॥२९॥

४४५) श्वस्तनी ॥३०॥

ता तारौ तारस् । तासि तास्थम् तास्थ । तास्मि तास्वस् तास्मस् ॥ ता तारौ तारस् । तासे तासाथे ताध्वे । ताहे तास्वहे तास्महे ॥ एतानि श्वस्तनी स्युः ॥३०॥

४४६) आशीः ॥३१॥

यात् यास्ताम् यासुः । यास् यास्तम् यास्त । यासम् यास्व यास्म ॥ सीष्ट सीयास्ताम् सीरन् । सीष्ठास् सीयास्थाम् सीध्वम् । सीय सीवहि सीमहि । एतानि आशीः स्युः ॥३१॥

४४७) स्य संहितानि त्यादीनि भविष्यन्ती ॥३२॥

स्यसंहितानि त्यादीनि भविष्यन्ती स्युः । स्यति स्यतस् स्यन्ति । स्यसि स्यथस् स्यथ । स्यामि स्यावस् स्यामस् ॥ स्यते स्येते स्यन्ते । स्यसे स्येथे स्यध्वे । स्ये स्यावहे स्यामहे ॥ एतानि भविष्यन्ती स्युः ॥३२॥

४४८) द्यादीनि क्रियातिपत्तिः ॥३३॥

स्येन संहितानि द्यादीनि क्रियातिपत्तिः स्युः । स्यत् स्यताम् स्यन् । स्यस् स्यतम् स्यत । स्यम् स्याव स्याम । स्यत स्येताम् स्यन्त । स्यथास् स्येथाम् स्यध्यम् । स्ये स्यावहि स्यामहि ॥ एतानि क्रियातिपत्तिः स्युः ॥३३॥

४४९) षडाद्याः सार्वधातुकम् ॥३४॥

षण्णां विभक्तीतामाद्या वर्तमानासप्तमीपञ्चमीह्यस्तन्यः सार्वधातुकं स्युः ॥३४॥

इति श्रीमेरुतङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ

(तृतीयाध्याये आख्याते) प्रथमः पादः ॥

(अथ द्वितीय पादः ।)

४५०) प्रत्ययः परः ॥१॥

प्रकृतेः परः प्रत्ययो ज्ञेयः । कर्ता ॥१॥

४५१) गुप्तिज्किद्भ्यः सन् ॥२॥

गर्हार्थाद् गुपः, क्षमार्थात् तिजः, संदेहप्रतीकारार्थात् कितः स्वार्थे सन् स्यात् । जुगुप्से । तितिक्षे विचकित्स । व्याधिचिकित्सा ॥२॥

४५२) मानबधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥३॥

क्रमेण विचारवैरुप्यार्जवनिशानार्थेभ्यः स्वार्थे सन् स्यात् । अभ्यासेकारस्य च दीर्घः । मीमांसे । बीभत्से । दीदांसे । शीशांसे ॥३॥

४५३) धातोर्वा तुमन्तादिच्छतिनैककर्तृकात् ॥४॥

इच्छतिनैककर्तृकाद् वा तुमन्ताद् धातोः सन् स्यात् । यियक्षते ॥४॥

४५४) नाम्न आत्मेच्छायां यिन् ॥५॥

नाम्नः पर आत्मेच्छार्थे यिन् स्यात् । पुत्रीय । भ्रातृपुत्रीय । मान्ताव्ययाभ्यां न । किमिच्छ । स्वरिच्छ ॥५॥

४५५) काम्य च ॥६॥

नाम्नः पर आत्मेच्छार्थे काम्यश्च स्यात् । पुत्रकाम्य । इदंकाम्य । स्वःकाम्य ॥६॥

४५६) उपमानादाचारे ॥७॥

उपमानान्नाम्न आचारेऽर्थे यिन् स्यात् । पुत्रीय माम् । आधाराच्च । कुटीय सौधे ॥७॥

४५७) कर्तुरायिः सलोपश्च ॥८॥

कर्तुरुपमानान्नाम्न आचारेऽर्थे आयिः स्यात् । सम्भवे वा सलोपश्च । हंसाये । पयाये । पयस्ये । आयेर्वा लोपः । हंसति ॥८॥

४५८) इन् कारितं धात्वर्थे ॥९॥

नाम्नः परो धात्वर्थे इन् स्यात् । स च कारितसंज्ञः । हलय । मुण्डय ॥९॥

४५९) धातोश्च हेतौ ॥१०॥

हेतुकर्तृव्यापारेऽर्थे धातोरिन् स्यात् । स च कारितसंज्ञः । पाचय ॥१०॥

४६०) चुरादेश्च ॥११॥

चुरादिधातुभ्यः स्वार्थे इन् स्यात् । सच कारितसंज्ञः । चोरय । युजादेर्वा । योजय । योज ॥११॥

४६१) इनि लिङ्गस्यानेकारक्षरस्यान्त्यस्वरादे र्लोपः ॥१२॥
अक्षरं स्वरः । अनेकस्वरस्य लिङ्गस्यानेकाक्षरस्यान्त्यस्वरादेरिनि परे लोपः स्यात् । अतिहस्तय । अनेकाक्षरस्य किम् ? त्वचय । इमनिष्ठेयंसि च । म्रदिमा । पटिष्टः । पटीयान् ॥१२॥

४६२) र शब्द ऋतो लघोर्व्यञ्जनादेः ॥१३॥
व्यञ्जनादेरनेकस्वरलिङ्गस्य लघो ऋकारस्येनि परे रशब्दः स्यात् । प्रथम । इमनादौ च । प्रथिमा । प्रथिष्ठः ॥१३॥

४६३) धातोर्यशब्दश्चेक्रीयितं क्रियासमभिहारे ॥१४॥
व्यञ्जनादेरेकस्वराद् धातोः क्रियासमभिहारेऽर्थे यशब्दः स्यात् । स च चेक्रीयितसंज्ञः । पापच्ये । ऋमुख्येभ्यश्च । अरार्ये । अटाट्ये । व्यञ्जनादेः किम् ? भृशमत्ति (अशाश्यते) । एकस्वरात् किम् ? भृशं चकास्ति । वा लुक् चेक्रीयितस्य । पापक्ति ॥१४॥

४६४) गुपूधूपविच्छिपणिपनेरायः ॥१५॥
एभ्यः स्वार्थे आयः स्यात् । गोपाय । धूपाय । विच्छाय । पणाय । पनाय । कमेरिनङ् । कामये । इमावसार्वधातुके वा । गोपायिता । गोप्ता । कामयिता । कमिता ॥१५॥

४६५) ते धातवः ॥१६॥
ते सनाद्या धातवः स्युः ।.१६॥

४६६) चकास्कास्प्रत्ययान्तेभ्य आम् परोक्षायाम् ॥१७॥
चकास्ग्रहणादनेकस्वराद् धातोः कास्प्रत्ययान्तेभ्यश्च परोक्षायामाम् स्यात् । चकासामास । दरिद्राञ्चकार । कासाञ्चक्रे । चोरयामास । स्वमास ॥१७॥

४६७) दययासश्च ॥१८॥
एभ्यः परः परोक्षायामाम् स्यात् । दयाञ्चक्रे । पलायाञ्चक्रे । आसाञ्चक्रे ॥१८॥

४६८) नाम्यादेर्गुरुमतोऽनृच्छः ॥१९॥
ऋच्छवर्जाद् गुरुमतो नाम्यादेर्धातोः परोक्षायामाम् स्यात् । ईहाञ्चक्रे । उब्जाञ्चक्रे । अनृच्छः किम् ? आनर्च्छ । नोर्णोः । प्रोर्णुनाव ॥१९॥

४६९) उषविदजागृभ्यो वा ॥२०॥
एभ्यः परोक्षायां वा आम् स्यात् । उषाञ्चकार । उवोष । विदामास । विवेद । जागरामास । जजागार । समिधे वा । समिधाञ्चक्रे । समीधे ॥२०॥

४७०) भीह्रीभृहुवां तिवच्च ॥२१॥
एभ्यः परोक्षायां वाऽऽम् स्यात् । स च तिरिव बिभयाञ्चकार । बिभाय । जिह्रयामास । जिह्राय । बिभरामास । बभार । जुहवामास । जुहाव ॥२१॥

४७१) आमः कृञनुप्रयुज्यते ॥२२॥

आमः परः कृञ् अनुप्रयुज्यते । ऊहाञ्चक्रे । विदः पञ्चम्यां वा कृञ् । विदाङ्कुरु । विद्धि ॥२२॥

४७२) असभुवौ च परस्मै ॥२३॥

आमः परावसभुवौ प्रयुज्येते । आत्मनेपदस्थाने परस्मैपदं च । ईक्षामास । ईक्षाम्बभूव । अन्वाचयशिष्टादेशत्वात्, ईक्षामासे त्वया ॥२३॥

४७३) सिज् अद्यतन्याम् ॥२४॥

धातोः परोऽद्यतन्यां सिच् स्यात् । अचैषीत् ॥२४॥

४७४) सणनिटः शिडन्तान्नाम्न्युपधाददृशः ॥२५॥

दृश्वर्जात् शिडन्तान्नाम्न्युपधादनिटो धातोरद्यतन्यां सण् स्यात् । अविक्षत् । अलिक्षत् । अदृशः किम् ? अद्राक्षीत् ॥२५॥

४७५) श्रिद्रुस्रुकमिकारितान्तेभ्यश्चण् कर्तरि ॥२६॥

एभ्यः कर्तर्यद्यतन्यां चण् स्यात् । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । अचकमत् । अपीपचत् । कर्तरि किम् ? तेनाहमश्रयिषि ॥२६॥

४७६) अण् असुवचिख्यातिलिपिसिचिह्वः ॥२७॥

एभ्यः कर्तर्यद्यन्याम् अण् स्यात् । अपास्यत । अवोचत् । अख्यत् । अलिपत् । असिचत् । आह्वत् ॥२७॥

४७७) पुषादिद्युतादिलृकारानुबन्धार्तिसर्तिशास्तिभ्यश्च परस्मै ॥२८॥

एभ्यः परः कर्तर्यद्यतन्यां परस्मैपदेऽण् स्यात् । अपुषः । अद्युतः । आगमः । आरः । असरः । अशिषः । ऋदिन्मुख्येभ्यो न वा । अरुधः । अरौत्सीः । परस्मै किम् ? अद्योतिष्ट ॥२८॥

४७८) इजात्मने पदेः प्रथमैकवचने ॥२९॥

पदिधातोः कर्तर्यद्यतन्यामात्मनेपदे प्रथमैकवचने ते परे इच् स्यात् । उदपादि । मुत् । दीपादेर्वा । अदीपि । अदीपिष्ट ॥२९॥

४७९) भावकर्मणोश्च ॥३०॥

सर्वस्माद् धातोर्भावकर्मणोरद्यतन्यां ते परे इच् स्यात् । अस्थायि मया । अकारि कटः । स्वरग्रहदृशहनभ्यः स्यसिजाशीःश्वस्तन्यां टिज् वा । स्थायिष्यते । स्थास्यते । घानिता । हन्ता ॥३०॥

४८०) सार्वधातुके यण् ॥३१॥

धातोर्भावकर्मणोः सार्वधातुके यण् स्यात् । स्थीयते । पच्यते अन्नं मया ॥३१॥

४८१) अन् विकरणः कर्तरि ॥३२॥

धातोः कर्तरि सार्वधातुके अन् विकरणः स्यात् । भव ॥३२॥

४८२) दिवादेर्यन् ।।३३।।
दिवादिभ्यः कर्तरि सार्वधातुके यन् स्यात् । दीव्य ।।३३।।

४८३) नुः स्वादेः ।।३४।।
स्वादिभ्यः कर्तरि सार्वधातुके नुः स्यात् । सुनु । स्वार्थे तक्षो वा । तक्ष्णोति । स्वार्थे किम् ? संतक्षति वाग्भिः शिष्यम् ।।३४।।

४८४) श्रुवः शृ च ।।३५।।
श्रुधातोर्विकरणे नुः शृश्च स्यात् । शृणु ।।३५।।

४८५) स्वराद् रुधादेः परो नशब्दः ।।३६।।
रुधादेः स्वरात् परः कर्तरि सार्वधातुके नशब्दः स्यात् । रुणद्धि ।।३६।।

४८६) तनादेरुः ।।३७।।
तनादेः कर्तरि सार्वधातुके उः स्यात् । तनु । कृञश्च । कुरु ।।३७।।

४८७) ना क्र्यादेः ।।३८।।
क्र्यादेः कर्तरि सार्वधातुके ना स्यात् । क्रीणाति ।।३८।।

४८८) आन व्यञ्जनान्ताद्धौ ।।३९।।
व्यञ्जनान्तात् क्र्यादेः कर्तरि हौ परे आनः स्यात् । पुषाण ।।३९।।

४८९) आत्मनेपदानि भावकर्मणोः ।।४०।।
धातोर्भावकर्मणोरात्मनेपदानि स्युः । भूयते । पीयते पयः ।।४०।।

४९०) कर्मवत् कर्मकर्ता ।।४१।।
कर्मकर्ता कर्मवत् स्यात् । लूयते, अलावि, लविष्यते वा, केदारः स्वयमेव ।।४१।।

४९१) कर्तरि रुचादिङानुबन्धेभ्यः ।।४२।।
रुचादिभ्यो ङानुबन्धेभ्यश्च कर्तर्यात्मनेपदानि स्युः । रोचते । शेते । निविशादिभ्यश्च । निविशते ।।४२।।

४९२) चेक्रीयितान्तात् ।।४३।।
चेक्रीयितान्तात् कर्तर्यात्मनेपदं स्यात् । लोलूये ।।४३।।

४९३) आय्यन्ताच्च ।।४४।।
आय्यन्तात् कर्तर्यात्मनेपदं स्यात् । हंसाये । अन्तग्रहणाद् आयिलोपे न । घटति ।।४४।।

४९४) इन्ञ्यजादेरुभयम् ।।४५।।
इनन्ताद् ञनुबन्धाद् यजादेश्च कर्तर्युभयपदं स्यात् । कारयति । कारयते । सुनोति । सुनुते । यजति । यजते । फलवत्कर्तयात्मने ।।४५।।

४९५) पूर्ववत् सनन्तात् ।।४६।।

सन्पूर्वो या धातुस्तद्वत् सनन्तादपि पदं स्यात् । बुभूषति । रुरोचिषते ॥४६॥

४९६) शेषात् कर्तरि परस्मैपदम् ॥४७॥

उक्तेभ्यः शेषाद् धातोः कर्तरि परस्मैपदं स्यात् । भाति ॥४७॥

इति श्री मेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ (तृतीयाध्याये आख्याते) द्वितीयः पादः ॥

(अथ तृतीयः पादः ।)

४९७) द्विर्वचनमनभ्यासस्यैकस्वरस्याद्यस्य ॥१॥

अनभ्यासस्यैकस्वरस्याद्यस्य धातोरवयवस्य द्विर्वचनं स्यात् । जेघ्रीये । जजागार । आट । अनभ्यासस्य किम् ? जुगुप्सिषे । इनिकृतं स्थानिवत् । अजूहवः । स्वरविधिः स्वरे इत्याद्यग्रे किम् ? चक्रुः ॥१॥

४९८) स्वरादेर्द्वितीयस्य ॥२॥

स्वरादिधातोरनभ्यासस्यैकस्वरस्य द्वितीयावयवस्य द्विर्वचनं स्यात् । आशिशः । अटाट्ये । नामधातोर्यथेष्टम् । पुपुत्रीयिष । पुतित्रीयिष । पुत्रायियिष । स्वरादेर्द्वितीयात् । अशिश्वीयिष । अश्वीयियिष ॥२॥

४९९) न नबदराः संयोगादयोऽये ॥३॥

स्वरादेर्धातोर्द्वितीयावयवस्य संयोगादयो नबदरायादन्यस्मिन् परे द्विर्न स्युः । उन्दिदिष । उब्जिजिष । अड्डिडिष । इन्दिद्रीयिष । अये किम् ? अरार्ये ॥३॥

५००) पूर्वोऽभ्यासः ॥४॥

द्विरुक्तस्य धातोः पूर्वोऽवयवोऽभ्यासः स्यात् । देहि ॥४॥

५०१) द्वयमभ्यस्तम् ॥५॥

अभ्यासो धातुश्च द्वयमभ्यस्तं स्यात् । ददति ॥५॥

५०२) जक्षादिश्च ॥६॥

जक्षादिपञ्चधातवोऽभ्यस्तानि स्युः । जक्षति । जाग्रति । (दरिद्रति । चकासति । शासति) ॥६॥

५०३) चण्परोक्षाचेक्रीयितसनन्तेषु ॥७॥

चण्परोक्षयोश्चेक्रीयितसनन्तयोर्यथोक्तं द्विर्वचनं स्यात् । अपीपठः । आर । अशास्ये । प्रतीषिष ॥७॥

५०४) जुहोत्यादीनां सार्वधातुके ॥८॥

एषां सार्वधातुके द्विर्वचनं स्यात् । जुहोति । जहाति ॥८॥

५०५) अभ्यासस्यादिर्व्यञ्जनमवशेष्यम् ॥९॥

अभ्यासस्यादावेव व्यञ्जनं रक्ष्यम् । जग्लौ । आट ॥९॥

५०६) शिट्परोऽघोषः ॥१०॥
अभ्यासे शिट्परोऽघोषो रक्ष्यः । चुश्च्योत । शिट्परः किम् ? पप्सौ ॥१०॥

५०७) द्वितीयचतुर्थयोः प्रथमतृतीयौ ॥११॥
अभ्यासे द्वितीयचतुर्थयोः प्रथमतृतीयौ स्याताम् । चखान । दध्यौ ॥११॥

५०८) हो जः ॥१२॥
अभ्यासे हो जः स्यात् । जहौ ॥१२॥

५०९) कवर्गस्य चवर्गः ॥१३॥
अभ्यासे कवर्गस्य चवर्गः स्यात् । चक्रे । जुङुवे ॥१३॥

५१०) न कवतेश्चेक्रीयित ॥१४॥
कवतेरभ्यासस्य चवर्गो न स्यात् । कोकूये । कौतिकुवत्योस्तु (न) । चोकूये ।

५११) ह्रस्वः ॥१५॥
अभ्यासे दीर्घस्य ह्रस्वः स्यात् । ददौ ॥१५॥

५१२) ऋवर्णस्याकारः ॥१६॥
अभ्यासे ऋवर्णस्याकारः स्यात् । वव्रे ।

५१३) दीर्घ इणः परोक्षायामगुणे ॥१७॥
इणोऽभ्यासस्य परोक्षायामगुणे दीर्घः स्यात् । ईयुः । अगुणे किम् ? इयाय ॥१७॥

५१४) अस्यादेः सर्वत्र ॥१८॥
सर्वस्यां परोक्षायामभ्यासादेरस्य दीर्घः स्यात् । आद् ॥१८॥

५१५) तस्मान्नागमः परादिरन्तश्चेत् संयोगः ॥१९॥
तस्माद् दीर्घीभूताभ्यासाकारात् परादिर्नागमः स्याद्, धातोरन्तश्चेत् संयोगः । आनर्च्छुः ।
तस्मात् किम् ? आञ्छुः ॥

५१६) ऋकारे च ॥२०॥
दीर्घीभूताभ्यासाकारादृकारे नागमः स्यात् । आनृधे ॥२०॥

५१७) अश्नोतेश्च ॥२१॥
अश्नोतेदीर्घीभूताभ्यासाकारान्नागमः स्यात् । आनशे ॥२१॥

५१८) भवतेरः ॥२२॥
परोक्षायां भवतेरभ्यासस्याऽकारः स्यात् । बभूव ॥२२॥

५१९) निजिविजिविषां गुणः सार्वधातुके ॥२३॥
एषामभ्यासेकारस्य गुणः स्यात् । नेनेक्ति । वेवेक्ति । अवेवेट् ॥२३॥

५२०) भृञ्हाङ्माङामित् ॥२४॥

सार्वधातुके एषामभ्यासस्येत् स्यात् । बिभर्ति । जिहीते । मिमीते ॥२४॥

५२१) अर्तिपिपर्त्योश्च ॥२५॥

सार्वधातुकेऽनयोरभ्यासस्येत् स्यात् । इयर्ति । पिपृयात् ॥२५॥

५२२) सन्यवर्णस्य ॥२६॥

सनि परेऽभ्यासावर्णस्येत् स्यात् । पिपक्ष । सन्यभ्यासस्य किम् ? पापचिषे ॥२६॥

५२३) उवर्णस्य जान्तःस्थापवर्गपरस्यावर्णे ॥२७॥

सनि परेऽभ्यासोवर्णस्य जान्तः स्थापवर्गपरस्यावर्णे परे इत् स्यात् । जिजावयिष । यियावयिष । पिपावयिष । मिमावयिष। । श्रुस्रुद्रुप्रुप्लुच्योर्वा । शिश्रावयिष । सुस्रावयिष । जान्तःस्थेत्यादि किम् ? जुहावयिष । अवर्णे किम् ? बुभूष ॥२७॥

५२४) गुणश्चेक्रीयिते ॥२८॥

चेक्रीयितऽभ्यासनामिनो गुणः स्यात् । चेचीये । पोपूये ॥२८॥

५२५) दीर्घोऽनागमस्य ॥२९॥

चेक्रीयितेऽनागमस्याभ्यासस्य दीर्घः स्यात् । पापच्ये । अनागमस्य किम् ? वनीवच्ये ॥२९॥

५२६) वञ्चिस्रन्सिध्वन्सिभन्सिकसिपतिपदिस्कन्दामन्तो नी ॥३०॥

एषामभ्यासस्यान्तो नी स्यात् । वनीवच्ये । सनिस्रस्ये । दनीध्वास्ये । बनीभ्रस्ये । चनीकस्ये । पनीपत्ये । पनीपद्ये । चनीस्कद्ये ॥३०॥

५२७) अतोऽन्तोऽनुस्वारोऽनुनासिकान्तस्य ॥३१॥

आत् परोऽनुनासिकान्तस्तदन्तधातोश्चेक्रीयितेऽभ्यासस्यान्तोऽनुस्वारः स्यात् । बंभण्ये । अतः किम् ? बाभाम्ये ॥३१॥

५२८) जपादीनां च ॥३२॥

चेक्रीयिते एषामभ्यासाकारस्यान्तोऽनुस्वारः स्यात् । जंजप्ये । जंजभ्ये ॥३२॥

५२९) चरफलोरुच्च परस्यास्य ॥३३॥

चेक्रीयितेऽनयोरभ्यासान्तोऽनु स्वारपरस्याकारस्यानोदुच्च स्यात् । चंचूर्ये । पुंफुल्ये । अनोत् किम् ? चंचूर्ति । लुक्यय्यभ्यासकार्यम् ॥३३॥

५३०) ऋमतो रीः ॥३४॥

चेक्रीयिते ऋमद्धातोरभ्यासान्तो रीः स्यात् । परीपृच्छये । रिरौ च लुकि, नरिनर्ति । नर्नर्ति । नरीनर्ति ॥३४॥

५३१) अलोपे समानस्य सन्वल्लघुनीनि चण्परे ॥३५॥

समानस्यालोपे चण्परे इन्यभावस्य लघुनि धात्वक्षरे परे सन्वत् कार्यं स्यात् । अपीपचत् । अलीलवत् । अशिश्रवः अशुश्रवः । अलोपे समानस्य किम् ? अररचत् । समानस्य किम् ? अपीपठत् । घुनि किम् ? अततक्षत् । इनि किम् ? अचकमत ॥३५॥

५३२) दीर्घो लघोः ॥३६॥

समानस्यालोपे चण्परे इनि लघोरभ्यासस्य लघुधात्वक्षरे परे दीर्घः स्यात् । अचीकरः । स्वरादेर्न । अर्णुनवः । लघोः किम् ? अतित्रपः ॥३६॥

५३३) अत् त्वरादीनां च ॥३७॥

चण्परे इनि त्वरादीनामभ्यासस्यात् स्यात् । अतत्वरः । इच्च गणः । अजगणः । अजीगणः ॥३७॥

५३४) इतो लोपोऽभ्यासस्य ॥३८॥

इतः सूत्रादारभ्याभ्यासलोपः स्यादित्यधिकारः ॥३८॥

५३५) सनि मिमीमादारभलभशकपतपदामिस् स्वरस्य ॥३९॥

एषां स्वरस्य सनि परे इस् स्यात् । अभ्यासलोपश्च । डुमिङ् । मित्से । प्रमित्से । मा । उपमित्से । मित्स । दित्स । धित्स । आरिप्से । लिप्से । शिक्ष । पित्स । पित्से । नेटि । पिपतिष ॥३९॥

५३६) आप्नोतेरीः ॥४०॥

आप्नोतेः स्वरस्य सनि ईः स्यात् । अभ्यासलोपश्च । ईप्स ॥४०॥

५३७) दम्भेरिच्च ॥४१॥

दम्भेः स्वरस्य सनि इच्च ईच्च स्यात् । अभ्यासलोपश्च । धिप्स । धीप्स । इ नेटि । दिदंभिष ॥४१॥

५३८) दिगि दयतेः परोक्षायाम् ॥४२॥

देङः परोक्षायां दिगिः स्यात् । अभ्यासलोपश्च । दिग्ये ॥४२॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ (तृतीयाध्याये आख्याते) तृतीयः पादः ॥

(अथ चतुर्थः पादः।)

५३९) सपरस्वरायाः सम्प्रसारणमन्तःस्थायाः ॥१॥

अन्तःस्थाया यरलवाणां सपरस्वरायाः इउऋरूपं सम्प्रसारणं स्यादित्यधिकारः ॥१॥

५४०) ग्रहिज्यावयिव्यधिवष्टिव्यचिप्रच्छिवश्चिभ्रस्जीनामगुणे ॥२॥

एषामन्तःस्थायाः सपरस्वराया अगुणप्रत्यये सम्प्रसारणं स्यात् । गृह्ये । जिनाति । ऊयुः । विध्यः । उष्टः । विच । पृच्छ । वृश्च । भृज्ज । अगुणे किम् ? ग्रहीता ॥२॥

५४१) स्वपिवचियजादीनां यण्परोक्षाशीःषु ॥३॥

एषां यण्यगुणे परोक्षाशिषोः यथोक्तं सम्प्रसारणं स्यात् । सुप्यते । सुषुपुः । सुप्याः । उच्यते । ऊचुः । उच्याः । ईज्ये । ईजुः । इज्याः । कित् कृति च । सुप्तः । यजाद्या नव । उक्तिः । इष्टिः । गृहीत्वा ॥३॥

५४२) परोक्षायामभ्यासस्योभयेशाम् ।।४।।
उभयेषां ग्रहादिस्वपादीनामभ्यासस्य परोक्षायां सम्प्रसारणं स्यात् । जग्राह । जिज्यौ । सुष्वाप । उवाच । इयाज ।।४।।

५४३) व्यथेश्च ।।५।।
व्यथेरभ्यासस्य परोक्षायां सम्प्रसारणं स्यात् । विव्यथे ।।५।।

५४४) न वाश्व्योरगुणे च ।।६।।
वेश्वयोरभ्यासस्यागुणे गुणिनि परोक्षाप्रत्यये सम्प्रसारणं न स्यात् । ववतुः । ववौ । शिश्वियुः । शिश्वाय । वेधातोर्वा गुणे । ववुः । ऊवुः ।।६।।

५४५) स्वपिस्यमिव्येञां चेक्रीयिते ।।७।।
एषां चेक्रीयिते सम्प्रसारणं स्यात् । सोषुप्ये । सेसिम्ये । वेवीये ।।७।।

५४६) स्वापेश्चणि ।।८।।
स्वापेश्चणि सम्प्रसारणं स्यात् । असूषुपत् । असुषुपत् ।।८।।

५४७) ग्रहिस्वपिप्रच्छां सनि ।।९।।
एषां सनि परे सम्प्रसारणं स्यात् । जिघृक्ष । सुषुप्स । पिपृच्छिष ।।९।।

५४८) चायः किश्चेक्रीयिते ।।१०।।
चायश्चेक्रीयिते किः स्यात् । चेकीये ।।१०।।

५४९) प्यायः पिः परोक्षायाम् ।।११।।
प्यायश्चेक्रीयितपरोक्षयोः पिः स्यात् । पेपीये । आपीप्ये ।।११।।

५५०) श्वयतेर्वा ।।१२।।
श्वयतेश्चेक्रीयिते परोक्षायां सम्प्रसारणं वा स्यात् । शोशूये । शेश्वीये । शुशाव । शिश्वाय ।।१२।।

५५१) कारिते च संश्चणोः ।।१३।।
कारिते सति संश्चणोर्विषययोः सम्प्रसारणं वा स्यात्। शुशावयिष । शिश्वाययिष । अशूशवः । अशिश्वयः ।।१३।।

५५२) ह्वयतेर्नित्यम् ।।१४।।
ह्वेः सन्चण्विषये कारिते नित्यं सम्प्रसारणं स्यात् । जुहावयिष । अजूहवः ।।१४।।

५५३) अभ्यस्तस्य च ।।१५।।
ह्वेरभ्यस्तमात्रस्य सम्प्रसारणं स्यात् । जुहाव । जोहूये । जुहूष ।।१५।।

५५४) द्युतिस्वाप्योरभ्यासस्य ।।१६।।
अनयोरभ्यासस्य सम्प्रसारणं स्यात् । अदिद्युतः । सुष्वापयिष । घमादेर्न । सिष्वापयिष ।।१६।।

५५५) न सम्प्रसारणे ।।१७।।

सम्प्रसारणे कृते पुनः सम्प्रसारणं न स्यात् । विध्य ॥१७॥

५५६) वशेश्चेक्रीयिते ॥१८॥

वशेश्चेक्रीयिते सम्प्रसारणं न स्यात् । वावश्ये ॥१८॥

५५७) प्रच्छादीनां परोक्षायाम् ॥१९॥

प्रच्छिव्रश्चिभ्रस्जीनां परोक्षायां सम्प्रसारणं न स्यात् । पप्रच्छुः । वव्रश्चुः । बभ्रज्जुः ॥१९॥

५५८) सन्ध्यक्षरान्तानामाकारोऽविकरणे ॥२०॥

सन्ध्यक्षरान्तानामविकरणे विषये आकारः स्यात् । धाता । दाता । अविकरणे किम् ? द्यति ॥२०॥

५५९) न व्ययतेः परोक्षायाम् ॥२१॥

व्येः परोक्षायामाकारो न स्यात् । संविव्याय । संविव्ययिथ ॥२१॥

५६०) मीनातिमिनोतिदीङां गुणवृद्धिस्थाने ॥२२॥

एषां गुणवृद्धिप्राप्तौ आ स्यात् । प्रमाता । प्रमासीः । निमापय । उपादास्त । गुणवृद्धिस्थाने किम् ? प्रमीये ॥२२॥

५६१) सनि दीङः ॥२३॥

दीङः सनि आ वा स्यात् । दिदासे । दिदीषे ॥२३॥

५६२) स्मिजिक्रीङामिनि ॥२४॥

एषामिनि आः स्यात् । विस्मापय । जापय । क्रापय । अध्यापय ॥२४॥

५६३) सृजिदृशोरागमोऽकारः स्वरात् परो धुटि गुणवृद्धिस्थाने ॥२५॥

अनयोः स्वरात् परो धुडादिप्रत्यये गुणवृद्धिप्राप्तावकारागमः स्यात् । स्रष्टा । अद्राक्षीत् । गुणवृद्धिस्थाने किम् ? सृक्षीष्ट । (दृक्षीष्ट) सृप्-स्पृश्-मृश्-तृप्-दृपो वा । सर्प्ता । अस्प्राक्षीः । अस्पार्क्षीः ॥२५॥

५६४) दीङोऽन्तो यकारः स्वरादावगुणे ॥२६॥

दीङोऽन्तः स्वरादावगुणे यकारः स्यात् । उपदिदीये ॥२६॥

५६५) आलोपोऽसार्वधातुके ॥२७॥

धातोराकारस्य स्वरादावगुणेऽसार्वधातुके लोपः स्यात् । पपुः । गोदः । असार्वधातुके किम् ? याति ॥२७॥

५६६) इटि च ॥२८॥

धातोराकारस्येटि लोपः स्यात् । ददिथ ॥२८॥

५६७) दामागायतिपिबतिस्थास्यतिजहातीनामीकारो व्यञ्जनादौ ॥२९॥

एषामन्तो व्यञ्जनादावगुणेऽसार्वधातुके ईकारः स्यात् । दीये । धीये । मीये । गीये । पीये । स्थीयते । अवसीये । हीये । एषां किम् ? गाङ् । गायते । पायते ॥२९॥

५६८) आशिष्येकारः ॥३०॥
एषामन्तो व्यञ्जनादावगुणे आशिषि एकारः स्यात् । देयाः । धेयाः । मेयाः । इत्यादि । संयोगादेरातोऽस्थो वा । ग्लेयाः । ग्लायाः । अस्थः किम् ? स्थेयाः ॥३०॥

५६९) अन उस् सिजभ्यस्तविदादिभ्योऽभुवः ॥३१॥
भूवर्जमेभ्योऽन् उस् स्यात् । अकार्षुः । अदुः । अददुः । विद्द्विषादन्तेभ्यो वा । अविदुः । अविदन् । अद्विषुः । अद्विषन् । अयुः । अयान् । अभुवः किम् ? अभूवन् ॥३१॥

५७०) इचस्तलोपः ॥३२॥
इचः परस्य तस्य लोपः स्यात् । अपादि । अलावि ॥३२॥

५७१) हेरकारादहन्तेः ॥३३॥
हनलक्षितधातोरन्याकारात् हेर्लोपः स्यात् । पच । हन् इत्यादि किम् ? जहि । याहि ॥३३॥

५७२) नोश्च विकरणादसंयोगात् ॥३४॥
असंयोगान्नोर्विकरणात् हेर्लोपः स्यात् । चिनु । संयोगात् । आप्नुहि ॥३४॥

५७३) उकाराच्च ॥३५॥
उकारविकरणात् हेर्लोपः स्यात् । तनु । तुह्योस्तातण् वाशिषि । तनुतात् ॥३५॥

५७४) उकारलोपो वमोर्वा ॥३६॥
असंयोगात् परस्य विकरणोकारस्यागुणिनोर्वमोः परयोर्वा लोपः स्यात् । सुन्वः । सुनुवः । तन्मः । तनुमः । संयोगात् तु तक्ष्णुवः ॥३६॥

५७५) करोते र्नित्यम् ॥३७॥
कृञः परस्योकारस्यागुणिनो र्वमोः परयोर्नित्यं लोपः स्यात् । कुर्वः । कुर्मः ॥३७॥

५७६) ये च ॥३८॥
कृञः परस्योकारस्य ये परे लोपः स्यात् । कुर्याः ॥३८॥

५७७) अस्योकारः सार्वधातुकेऽगुणे ॥३९॥
कृञोऽकारस्यागुणे सार्वधातुके उकारः स्यात् । कुरु ॥३९॥

५७८) रुधादेर्विकरणान्तस्य लोपः ॥४०॥
रुधादेर्विकरणान्तस्यागुणे सार्वधातुके उकारः स्यात् । रुन्द्धः । अगुणे किम् ? भिनत्ति ॥४०॥

५७९) अस्तेरादेः ॥४१॥
अस्तेरादेरगुणे सार्वधातुके लोपः स्यात् । सन्ति । अगुणे किम् ? अस्ति ॥४१॥

५८०) अभ्यस्तानामाकारस्य ॥४२॥
अभ्यस्तानामाकारस्यागुणे सार्वधातुके लोपः स्यात् । दत्ते । मिमते ॥४२॥

५८१) क्रयादीनां विकरणस्य ॥४३॥

क्र्यादिधातूनां विकरणस्याकारस्यागुणे सार्वधातुके लोपः स्यात् । क्रीणे ॥४३॥

५८२) उभयेषामीकारो व्यञ्जनादावदः ॥४४॥

उभयेषामभ्यस्त क्र्यादिविकरणानामाकारस्य दावर्जं व्यञ्जनादावगुणे सार्वधातुके ईकारः स्यात् । मिमीते । लुनीहि । व्यञ्जनादौ किम् ? मिमताम् । सार्वधातुके किम् ? लालाये । अदः किम् ? दत्से ॥४४॥

५८३) इकारो दरिद्रातेः ॥४५॥

दरिद्रातेर्व्यञ्जनादावगुणे सार्वधातुके इकारः स्यात् । दरिद्रितः । भीजहात्योर्वा । बिभितः । बिभीतः । जहितः । जहीतः ॥४५॥

५८४) लोपः सप्तम्यां जहातेः ॥४६॥

जहातेरन्तस्यागुणसप्तम्यां लोपः स्यात् । जह्यम् ॥४६॥

५८५) धुटि हन्तेः सार्वधातुके ॥४७॥

हन्तेरन्तस्य धुडादावगुणे सार्वधातुके लोपः स्यात् । हतः । जंघतः । धुटि किम् ? हन्वः सिच्यात्मने न । आहतः ॥४७॥

५८६) शासेरिदुपधाया अणव्यञ्जनयोः ॥४८॥

शास्तेरुपधाया अण्यगुणे व्यञ्जनादौ च इत् स्यात् । अन्वशिषत् । अनुशिष्टः । शास्तेः किम् ? आशास्ते ॥४८॥

५८७) हन्तेर्ज हौ ॥४९॥

हौ परे हनो हस्य जः स्यात् । जहि । हौ किम् ? हतात् ॥४९॥

५८८) दास्त्योरेऽभ्यासलोपश्च ॥५०॥

दास्त्योरन्तस्य हौ परे ए स्यादभ्यासलोपश्च । देहि । धेहि । एधि ॥५०॥

५८९) अस्यैकव्यञ्जनमध्येऽनादेशादेः परोक्षायाम् ॥५१॥

अनादेशादेर्धातोरेकव्यञ्जन मध्यगतस्यास्य गुणे परोक्षायामेत्वं स्यादभ्यासलोपश्च । सेहे । एकव्यञ्जनमध्ये किम् ? ततक्षुः । अनादेशादेः किम् ? बभणुः ॥५१॥

५९०) थलि च सेटि ॥५२॥

अनन्तरोक्तस्यास्य सेटि थलि एत्वं स्यादभ्यासलोपश्च । पेचिथ । सेटि किम् ? पपक्थ ॥५२॥

५९१) तृफलभजत्रपश्रन्थिग्रन्थिदम्भीनां च ॥५३॥

एषामन्तस्यागुणे परोक्षायां सेटि थलि एत्वं स्यात् । अभ्यासलोपश्च । तेरुः । तेरिथः । फेलुः । फेलिथः । भेजुः । भेजिथः । त्रेपे । श्रेथुः । ग्रेथुः । देभुः ॥५३॥

५९२) न शसददवादिगुणिनाम् ॥५४॥

शसददयोर्वादीनां गुणिनां चास्यानन्तरोक्तप्रत्यये प्राप्तं कार्यं न स्यात् । विशशसिथ । दददे । ववसुः । निनयिथ ॥५४॥

५९३) स्वरादाविवर्णोवर्णान्तस्य धातुरियुवौ ॥५५॥
इवर्णोवर्णान्तधातोः स्वरादावगुणे प्रत्यये इयुवौ स्तः । शिश्रियुः । चिक्रियुः । पुवन्ति । लुलुवुः । स्वरादौ किम् ? श्रीयाः ॥५५॥

५९४) अभ्यासस्यासवर्णे ॥५६॥
इवर्णोवर्णान्ताभ्यासस्यासवर्णे स्वरे इयुवौ स्तः । इयृयात् । उवेषुः । सवर्णे तु, ईषुः ॥५६॥

५९५) नोर्विकरणस्य ॥५७॥
नुविकरणस्यागुणे स्वरादौ उव् स्यात् । आप्नुवति । विकरणस्य किम् ? तन्वन्ति ॥५७॥

५९६) य इवर्णस्यासंयोगपूर्वस्यानेकाक्षरस्य ॥५८॥
अनेकाक्षरधातोरसंयोगपूर्वस्येवर्णस्यागुणे स्वरादौ यः स्यात् । दिग्ये । निन्ये । संयोगपूर्वस्य तु, शिश्रियुः । अधीये ॥५८॥

५९७) इणश्च ॥५९॥
इणोऽगुणे स्वरादौ यः स्यात् । यन्ति । इको वा । अधियन्ति । अधीये ॥५९॥

५९८) नोर्वकारो विकरणस्य ॥६०॥
असंयुक्तस्य नोर्विकरणस्यागुणे स्वरादौ वकारः स्यात् । चिन्वे । असंयुक्तस्य किम् ? प्राप्नुवन्ति ॥६०॥

५९९) जुहोतेः सार्वधातुके ॥६१॥
सार्वधातुके जुहोतेरन्तस्य (उकारस्य) सार्वधातुकेऽगुणे स्वरादौ वः स्यात् । जुह्वति । सार्वधातुके किम् ? जुहुवुः ॥६१॥

६००) भुवो वोऽन्तः परोक्षाद्यतन्योः ॥६२॥
एतयोः स्वराद्योः परयोर्भुवो वकारोऽन्तः स्यात् । बभूव । अभूवम् । बहिरङ्गत्वात्, बभूवुषः ॥६२॥

६०१) गोहेरुदुपधायाः ॥६३॥
गुहो गुणे कृतस्वरादिप्रत्यये उपधाया ऊत् स्यात् । गूहति । गूहकः । गोहेः किम् ? जुगुहुः ॥६३॥

६०२) दुषेः कारिते ॥६४॥
दुषेरुपधायाः कारिते ऊत् स्यात् । दूषय । चित्ते वा । मनो दूषय, दोषय वा ॥६४॥

६०३) मानुबन्धानां ह्रस्वः ॥६५॥
घटादयोऽमान्ताश्च मानुबन्धास्तेषामुपधायाः कारिते ह्रस्वः स्यात् । घटय । व्यथय । रमय । गमय । न कम्यमिचमः । कामये । आमय । आचामय ॥६५॥

६०४) इचि वा ॥६६॥
मानुबन्धानां कारिताद् इचि परे ह्रस्वो वा स्यात् । अघटि अघाटि । अक्षञि । अक्षाञि ॥६६॥

६०५) जनिवध्योश्च ॥६७॥

एतयोरिचि नित्यं ह्रस्वः स्यात् । अजनि । अवधि ।।६७।।

६०६) **ओतो यिन्नायी स्वरवत्** ।।६८।।

ओदन्तात् परौ यिन्नायी स्वरवत् स्तः । गव्यः । गव्यौ ।।६८।।

६०७) **औतश्च** ।।६९।।

औदन्तात् परौ यिन्नायी स्वरवत् स्तः । नाव्यम् । नाव्ये ।।६९।।

६०८) **नाम्यन्तानां यणायियिन्नाशीश्विचेक्रीयितेषु ये दीर्घः** ।।७०।।

नाम्यन्तानां यणादौ ये च्वौ च परे दीर्घः स्यात् । चीये । साधूये । मुनीये । चीयाः । चेचीये । पटूकुरु । ये किम् ? कृषीष्ट ।।७०।।

६०९) **इणोऽनुपसृष्टस्य** ।।७१।।

इणोऽनुपसृष्टस्यैवाशिषि से परे दीर्घः स्यात् । ईयाः । अनुपसृष्टस्य किम् ? अन्वियाः । आशिषि किम् ? समीये ।।७१।।

६१०) **ऋत ईदन्तश्च्विचेक्रीयितयिन्नायिषु** ।।७२।।

ऋदन्तस्य च्व्यादौ ईदन्तः स्यात्। पित्रीस्यात् । चेक्रीये । मात्रीय । मात्रीये । ऋतः किम् ? चेकीर्यें ।।७२।।

६११) **इरन्यगुणे** ।।७३।।

ऋदन्तस्यागुणे अनि इदन्तः स्यात् । आद्रियेे ।।७३।।

६१२) **यणाशिषोर्ये** ।।७४।।

ऋदन्तस्य यणाशिषोर्ये इदन्तः स्यात् । क्रिये । क्रियाः ।।७४।।

६१३) **गुणोऽर्तिसंयोगाद्योः** ।।७५।।

अर्तिसंयोगादेश्च धातोर्यणाशिषोर्ये गुणः स्यात् । अर्यते । अर्याः । स्मर्यते । स्मर्याः । बहिरङ्गत्वात्, संस्क्रिये ।।७५।।

६१४) **चेक्रीयिते च** ।।७६।।

अर्तिसंयोगाद्योश्चेक्रीयिते गुणः स्यात् । अरार्ये । सास्मर्ये ।।७६।।

६१५) **घ्राध्मोरी** ।।७७।।

घ्राध्मोश्चेक्रीयिते ई स्यात् । जेघ्रीये । देध्मीये । हनो घ्नीर्वा । जेघ्नीये । जङ्घन्ये ।।७७।।

६१६) **यिन्यवर्णस्य** ।।७८।।

अवर्णस्य यिनि ईः स्यात् । जलीय । मालीय । च्वौ च । सितीस्यात् । मालीभव ।।७८।।

६१७) **अदेर्घस्लृ सनद्यतन्योः** ।।७९।।

एतयोः परयोरदो घस्लृः स्यात् । जिघत्स । अघसः ।।७९।।

६१८) **वा परोक्षायाम्** ।।८०।।

परोक्षायामदो घस्लृर्वा स्यात् । आद । जघास ॥८०॥

६१९) वेञश्च वयिः ॥८१॥

वेञः परोक्षायां वयिः स्यात् । उवाय । ववौ ॥८१॥

६२०) हन्तेर्वधिराशिषि ॥८२॥

हन् आशिषि वधः स्यात् । वध्याः । नेटि च । धानिषीष्टम् ॥८२॥

६२१) अद्यतन्यां च ॥८३॥

हनोऽद्यतन्यां वधिः स्यात् । अवधीः । वात्मनेपदे । आहत । आवधिष्ट ॥८३॥

६२२) इणो गा ॥८४॥

इणोऽद्यतन्यां गाः स्यात् । अगाः । इकश्च । अध्यगाः ॥८४॥

६२३) इङः परोक्षायाम् ॥८५॥

अस्यां परोक्षाविषये इङो गाः स्यात् । अधिजगे ॥८५॥

६२४) सनीणिङोर्गमिः ॥८६॥

इण्-इङ्-इकां सनि गमिः स्यात् । जिगमिषा । मन्त्रमधिजिगांसे । अध्यजिगमिषः ॥८६॥

६२५) अस्तेभूरिसार्वधातुके ॥८७॥

अस्तेरसार्वधातुके विषये भूः स्यात् । भविता । अस्तेः किम् ? असिता ॥८७॥

६२६) ब्रुवो वचिः ॥८८॥

असार्वधातुकविषये ब्रुवो वचिः स्यात् । वक्ता ॥८८॥

६२७) चक्षिङः ख्याञ् ॥८९॥

असार्वधातुके चक्षिङः ख्याञ् स्यात् । आख्यास्यति । आख्यास्ये । क्शाञ्श्च । आक्शास्यति ॥८९॥

६२८) वा परोक्षायाम् ॥९०॥

चक्षः परोक्षाविषये वा ख्याञ्क्शञौ स्तः । आचख्ये । आचक्शौ । आचचक्षे ॥९०॥

६२९) अजेर्वी ॥९१॥

असार्वधातुके विषये अजेर्वी स्यात् । विव्युः । भृज्जतेर्वा । भर्ज् । भ्रष्टुम् । भर्ष्टुम् । बभर्जुः । बभ्रजुः ॥९१॥

६३०) अदादेर्लुग् विकरणस्य ॥९२॥

अदादेर्विकरणस्य लुक् स्यात् । अत्ति । हन्ति ॥९२॥

६३१) इण्स्थादापिबतिभूभ्यः सिचः परस्मै ॥९३॥

एभ्यः परस्मैपदे सिचः लुक् स्यात् । अगाः । इकोऽपि । अध्यगाः । अस्थाः । अदाः । अधाः । अपाः । अभूः । परस्मै किम् ? प्रास्थिषत ॥९३॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ

अथ पञ्चमः पादः ।

६३२) नाम्यन्तयोर्धातुविकरणयोर्गुणः ॥१॥
नाम्यन्तयोर्धातुविकरणयो गुणिनि प्रत्यये गुणः स्यात् । एता । नेता । स्तोता । भविता । कर्ता । तरिता । सुनोति ॥१॥

६३३) नामिनश्चोपधाया लघोः ॥२॥
धातोरुपधायां लघुनामिनो गुणिनि गुणः स्यात् । भेत्ता ॥२॥

६३४) अनि च विकरणे ॥३॥
धातोरुपधाया नाम्यन्तस्य चान्येव विकरणे गुणः स्यात् । वर्ते । जय । अन्येव किम् ? नृत्य ॥३॥

६३५) करोतेः ॥४॥
करोतेर्विकरणे गुणः स्यात् । करोति । तनादेश्च । समर्णोति ॥४॥

६३६) मिदेः ॥५॥
मिदेर्विकरणे गुणः स्यात् । मेद्य ॥५॥

६३७) अभ्यस्तानामुसि ॥६॥
अभ्यस्तानामुसि परे नामिनो गुणः स्यात् । अबिभरुः । अभ्यस्तानामुसि किम् ? जुहुवुः ॥६॥

६३८) न णकारानुबन्धचेक्रीयितयोः ॥७॥
णकारानुबन्धचेक्रीयितयोः परयोर्गुणो न स्यात् । अशिश्रियः । अधुक्षः । लोलूये ॥७॥

६३९) अभ्यस्तस्य चोपधाया नामिनः स्वरे गुणिनि सार्वधातुके ॥८॥
अभ्यस्तस्योपधाया नामिनः स्वरादौ गुणिन्यपि सार्वधातुके गुणो न स्यात् । नेनिजानि । अनेनिजुः ॥८॥

६४०) सनि चानिटि ॥९॥
धातोरुपधाया नामिनोऽनिटि सनि गुणो न स्यात् । बिभित्स । दित्स । धित्स । नलुक् । धिप्स ॥९॥

६४१) सिजाशिषोश्चात्मने ॥१०॥
धातोरुपधाया नामिन आत्मनेपदेऽनिटो सिजाशिषोर्गुणो न स्यात् । अभित्त । भित्सीष्ट । सेटोः । अवर्धिष्ट । वर्धिषीष्ट ॥१०॥

६४२) ऋदन्तानां च ॥११॥
ऋवर्णान्तानामात्मनेपदेऽनिटोः सिजाशिषोर्गुणो न स्यात् । अकृत । कृषीष्ट । अतीर्ष्ट । तीर्षीष्ट ॥११॥

६४३) **स्थादोश्च** ।।१२।।
स्थादोर्नामिन आत्मनेपदेऽनिटि सिचि गुणो न स्यात् । प्रास्थित । अदित । अधिषाताम् ।।१२।।

६४४) **भुवः सिजलुकि** ।।१३।।
सिचो लोपे भुवो गुणो न स्यात् । अभूत् । सिज्लुकि किम् ? व्यत्यभविष्ट ।।१३।।

६४५) **सूतेः पञ्चम्याम्** ।।१४।।
सूतेः पञ्चम्यां गुणो न स्यात् । सुवै ।।१४।।

६४६) **दीधीवेव्योश्च** ।।१५।।
अनयोः सर्वत्र गुणो न स्यात् । आदीध्यै आवेव्यै ।।१५।।

६४७) **रुदविदमुषां सनि** ।।१६।।
एषां सनि गुणो न स्यात् । रुरुदिष । मुमुषिष ।।१६।।

६४८) **नाम्यन्तानामनिटाम्** ।।१७।।
नाम्यन्तानामनिटि सनि गुणो न स्यात् । चिचीष । सेटं तु, शिश्रयिष ।

६४९) **सर्वेषामात्मने सार्वधातुकेऽनुत्तमे पञ्चम्याः** ।।१८।।
सर्वेषां गुणयोग्यनामिनां सार्वधातुके पञ्चम्युत्तमवर्जे आत्मनेपदे गुणो न स्यात् । स्तुते । चिनुते । पञ्चम्युत्तमे तु, स्तुवै ।।१८।।

६५०) **द्वित्वबहुत्वयोश्च परस्मै** ।।१९।।
सार्वधातुके पञ्चम्युत्तमवर्जे द्वित्वे बहुत्वे च गुणो न स्यात् । स्तुतः । तनुतः । दुहन्ति । पञ्चम्युत्तमे तु, दोहाव ।।१९।।

६५१) **परोक्षायां च** ।।२०।।
परोक्षायां परस्मैपदे बहुत्वे गुणो न स्यात् । विव्यतुः । दुदुहुः ।।२०।।

६५२) **सवर्त्रात्मने** ।।२१।।
परोक्षायां सर्वत्रात्मनेपदे गुणो न स्यात् । चक्रे । ददुहिरे ।।२१।।

६५३) **आशिषि च परस्मै** ।।२२।।
आशिषि परस्मैपदे गुणो न स्यात् । चीयाः । दुह्याम् । परस्मै किम् ? चेषीष्ट ।।२२।।

६५४) **सप्तम्यां च** ।।२३।।
सप्तम्यां गुणो न स्यात् । स्तुयात् । तन्वीत ।।२३।।

६५५) **हौ च** ।।२४।।
हौ गुणो न स्यात् । स्तुहि । दुग्धि ।।२४।।

६५६) **तुदादेरनि** ।।२५।।
तुदादेरनि गुणो न स्यात् । नुद ।।२५।।

६५७) अमि विदेरेव ।।२६।।
आमि विदेरेव गुणो न स्यात् । विदामास । विदेः किम् ? जागरामास ।।२६।।

६५८) कुटादेरनिनिचट्सु ।।२७।।
कुटादिरिन् इचअट्वर्जप्रत्यये गुणो न स्यात् । कुटिता । कुटादेः किम् ? लेखितु । अनिनिचट्सु किम् ? उत्कोटये । अकोटि । चुकोट ।।२७।।

६५९) विजेरिटि ।।२८।।
विजेरिटि गुणो न स्यात् । उद्विजिता । ऊर्णोवा । प्रोर्णुविता ।।२८।।

६६०) स्थादोरिरद्यतन्यामात्मने ।।२९।।
स्थादोरद्यतन्यामात्मनेपदे इः स्यात् । व्यस्थित । अदित । अधित ।।२९।।

६६१) मुचादेरागमो नकारः स्वरादनि विकरणे ।।३०।।
मुचादेः स्वरादनि विकरणे नकारागमः स्यात् । मुञ्च ।।३०।।

६६२) मस्जिनशोर्धुटि ।।३१।।
मस्जिनशोः स्वरात् धुटि नागमः स्यात् । मङ्क्ता । नङ्क्ष्यति ।।३१।।

६६३) रधिजभोः स्वरे ।।३२।।
अनयोः स्वरात् स्वरे परे नागमः स्यात् । रन्धय । अजम्भि ।।३२।।

६६४) नेटि रधेरपरोक्षायाम् ।।३३।।
परोक्षावर्जप्रत्यये इटि परे रधेः स्वरान्नागमो न स्यात् । रधिता । परोक्षायां किम् ? ररन्धिव ।।३३।।

६६५) रभिलभोरविकरणपरोक्षयोः ।।३४।।
अनयोः स्वराद् विकरणपरोक्षावर्जे स्वरे नागमः स्यात् । आरम्भय । अलम्भि । अविकरणपरोक्षयोः किम् ? आरभे । लेभे ।।३४।।

६६६) हुधुड्भ्यां हेर्धिः ।।३५।।
हुधुड्भ्यां परस्य हेर्धिः स्यात् । जुहुधि । भिन्धि ।।३५।।

६६७) अस्तेः ।।३६।।
अस्तेः परस्य हेर्धिः स्यात् । एधि ।।३६।।

६६८) शा शास्तेश्च ।।३७।।
शास्तेः परस्य हेर्धिः स्यात्, शास्तेश्च शादेशः । शाधि ।।३७।।

६६९) लोपोऽभ्यस्तादन्तिनः ।।३८।।
अभ्यस्तादन्तेर्नस्य लोपः स्यात् । ददति । जाग्रतु ।।३८।।

६७०) आत्मने चानकरात् ।।३९।।

अकारवर्जात् परस्यात्मनेपदेऽन्तेर्नस्य लोपः स्यात् । कुर्वते । व्यतिलाताम् । अनकारात् किम् ? पच्यन्ते ॥३९॥

६७१) शेते रिरन्तेरादिः ॥४०॥

शेतेः परस्यान्तेरादी रिः स्यात् । अशेरन् वेत्तेर्वा । संविद्रते । संविदते ॥४०॥

६७२) आकारादट औ ॥४१॥

आकारादट औ स्यात् । पपौ ॥४१॥

६७३) ऋदन्तस्येरगुणे ॥४२॥

ऋदन्तस्यागुणे प्रत्यये इर् स्यात् । तितीर्ष । चिकीर्ष ॥४२॥

६७४) उरोष्ठ्योपधस्य ॥४३॥

ओष्ठ्योपधऋदन्तस्यागुणे प्रत्यये उर् स्यात् । पुपूर्ष । बोभूये ॥४३॥

६७५) इन्यसमानलोपोपधाया ह्रस्वश्चणि ॥४४॥

समानस्यालोपे धातोरुपधायाश्चण्परे इनि ह्रस्वः स्यात् । अचीकरः । मा त्वमटिटः । असमानलीपेति किम् ? अससाम । उपधायाः किम् ? अचकाङ्क्षः ॥४४॥

६७६) न शास्वृदनुबन्धानाम् ॥४५॥

शासे ऋदनुबन्धानां चोपधायाश्चण्परे इनि ह्रस्वो न स्यात् । अशशासः । अडुढौकः ॥४५॥

६७७) लोपः पिबतेरीच्चाभ्यासस्य ॥४६॥

पिबतेरुपधायाश्चण्परे इनि लोपः स्यात् । अभ्यासस्य ईच्च । अपीप्यः ॥४६॥

६७८) तिष्ठतेरित् ॥४७॥

तिष्ठतेरुपधायाश्चण्परे इनि इत् स्यात् । अतिष्ठिपः ॥४७॥

६७९) जिघ्रतेर्वा ॥४८॥

जिघ्रतेरुपधायाश्चण्परे इनि इद् वा स्यात् । अजिघ्रिपः । अजिघ्रपः । ऋवर्णस्य रुद्वा । अवीवृधः । अववर्ध ॥४८॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ

(तृतीयाध्याये आख्याते) पञ्चमः पादः ॥

(अथ षष्ठः पादः ।)

६८०) अनिदनुबन्धानामगुणेऽनुषङ्गलोपः ॥१॥

इदनुबन्धवर्जधातूनामगुणप्रत्ययेऽनुषङ्गलोपः स्यात् । श्रस्यते । नष्टः । अनिदनुबन्धानां किम् ? शङ्क्ये । इदनुबन्धानांनोऽन्तः ॥१॥

६८१) नशब्दाच्च विकरणात् ॥२॥

सर्वधातूनां नशब्दात् विकरणात् सर्वप्रत्ययेऽनुषङ्गलोपः स्यात् । भनक्ति । हिंस्तः ॥२॥

६८२) परोक्षाया मिन्धिश्रन्थिग्रन्थिदम्भीनामगुणे ॥३॥

एषां परोक्षायामगुणेऽनुषङ्गलोपः स्यात् । समीधे । श्रेथुः । ग्रेथुः । देभुः । एषां किम् ? शश्रंसे ॥३॥

६८३) दंशिसञ्जिस्वञ्जिरञ्जीनामनि ॥४॥

एषामनि विकरणेऽनुषङ्गलोपः स्यात् । दश । सज । परिष्वजे । रजति । भञ्जेर्वेचि । अभाजि । अभञ्जि ॥४॥

६८४) अस्योपधाया दीर्घो वृद्धिर्नामिनामिनिचट्सु ॥५॥

इन्-इच्-अट्सु उपधाया अस्य दीर्घो नाम्यन्तानां वृद्धिः स्यात् । पाचय । अपाचि । अलावि । चकार । नाम्नो दीर्घः । त्वचय । अद्यन्ते वा । अहं पपच, पपाच । निनय, निनाय ॥५॥

६८५) सिचि परस्मै स्वरान्तानाम् ॥६॥

नामिस्वरान्तानां परस्मैपदे सिचि वृद्धिः स्यात् । अचैषीः । अलावीः । वार्णोः । प्रोर्णावीः । प्रोर्णुवीः । प्रौर्णवीः ॥६॥

६८६) व्यञ्जनान्तानामनिटाम् ॥७॥

अनिटां व्यञ्जनान्तधातूनामुपधानामिनः परस्मैपदे सिचि वृद्धिः स्यात् । अभैत्सीः । अनिटां किम् ? अकोषीः ॥७॥

६८७) अस्य च दीर्घः ॥८॥

अनिटां व्यञ्जनान्तधातूनामस्य परस्मैपदे सिचि दीर्घः स्यात् । अभाङ्क्षी ॥८॥

६८८) वदव्रजरलन्तानाम् ॥९॥

वदव्रजयोरलन्तानां चास्य परस्मैपदे सिचि दीर्घः स्यात् । अवादीः । अव्राजीः । अचारीः अचालीः ॥९॥

६८९) श्विजाग्रोर्गुणः ॥१०॥

श्विजाग्रोः परस्मैपदे सिचि गुणः स्यात् । अश्वयीः । अजागरीः ॥१०॥

६९०) अर्तिसर्त्योरणि ॥११॥

अनयोरणि गुणः स्यात् । मा त्वमरः । असरत् । ऋवर्णदृशोश्च । अजरः । अदर्शः ॥११॥

६९१) जागर्तेः कारिते ॥१२॥

जागुः कारिते गुणः स्यात् । जागरय ॥१२॥

६९२) यणाशिषोर्ये ॥१३॥

जागुर्यणाशिषोर्ये गुणः स्यात् । जागर्यते । जागर्याः ॥१३॥

६९३) परोक्षायामगुणे ॥१४॥

जागुः परोक्षायामगुणे गुणः स्यात् । जजागरुः ॥१४॥

६९४) ऋतश्च संयोगादेः ।।१५।।

संयोगादेर्धातोऋतः परोक्षायामगुणे गुणः स्यात् । सस्मरुः । सञ्चस्करुः ।।१५।।

६९५) ऋदन्तानां च ।।१६।।

ऋदन्तानां परोक्षायामगुणे गुणः स्यात् । तेरुः । निपपरुः । न किति । निपपुराणः ।।१६।।

६९६) ऋच्छ ऋतः ।।१७।।

सर्वपरोक्षायां ऋच्छ ऋतो गुणः स्यात् । आनर्च्छ । आनर्च्छुः । किति न । आनृच्छ्वान् ।।१७।।

६९७) शीङः सार्वधातुके ।।१८।।

शीङः सार्वधातुके गुणः स्यात् । शेते । शये ।।१८।।

६९८) अयीर्ये ।।१९।।

शीङः ईकारोऽगुणे येऽय् स्यात् । शय्यते । अतिशय्यते ।।१९।।

६९९) आयिरिच्यादन्तानाम् ।।२०।।

आदन्तानामिचि आयिः स्यात् । अदायि । दायिता ।।२०।।

७००) शाछासाह्वाव्यावेत्रपामिनि ।।२१।।

एषामिनि आयिः स्यात् । शायय । छायय । सायय । ह्वायय । व्यायय । वायय । पायय ।।२१।।

७०१) अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यादन्तानामन्तः पो यलोपो गुणश्च नामिनाम् ।।२२।।

अर्त्यादीनामादन्तानां चेनि पोऽन्तः स्यात् । संभवे यलोपो गुणश्च । अर्पय । ह्रेपय । ब्लेपया । रेपय । कनोपय । क्ष्मापय । स्थापय ।।२२।।

७०२) पातेर्लोऽन्तः ।।२३।।

पातेरिनि लोऽन्तः स्यात् । पालय ।।२३।।

७०३) धूञ्प्रीणात्योर्नः ।।२४।।

एतयोरिनि नोऽन्तः स्यात् । धूनय । प्रीणय । एतयोः किम् ? विधावय । प्रापय ।।२४।।

७०४) स्फायेर्वादेशः ।।२५।।

स्फायेरिनि वादेशः स्यात् । स्फावय ।।२५।।

७०५) शदेरगतौ तः ।।२६।।

अगत्यर्थशदेरिनि तः स्यात् । शातय । अगतौ किम् ? गाः शादय ।।२६।।

७०६) हन्तेस्तः ।।२७।।

हन्तेरिनि तः स्यात् । घातय ।।२७।।

७०७) हस्य हन्तेर्घिरिनिचोः ।।२८।।

हनो हस्य इनिचोर्घिः स्यात् । घातय । अघानि ।।२८।।

७०८) लुप्तोपधस्य च ।।२९।।

लुप्तोपधस्य हनो हस्य घिः स्यात् । घ्नन्ति ॥२९॥

७०९) अभ्यासाच्च ॥३०॥

अभ्यासाच्च हनो हस्य घिः स्यात् । हेरचणि । प्रजिघ्ये । चणि । प्राजीहय ॥३०॥

७१०) जेर्गिः सन्परोक्षयोः ॥३१॥

सन्परोक्षयोर्जेर्गिः स्यात् । जिगीष । जिग्ये ॥३१॥

७११) चेः किर्वा ॥३२॥

सन्परोक्षयोश्चेः किर्वा स्यात् । चिकीर्ष । चिचीष । चिक्ये । चिच्ये ॥३२॥

७१२) सणोऽलोपः स्वरेऽबहुत्वे ॥३३॥

सणोऽस्याबहुत्वे स्वरे लोपः स्यात् । अधुक्षि । अधुक्षाताम् । अबहुत्वे किम् ? अधुक्षन्त ॥३३॥

७१३) दरिद्रातेरसार्वधातुके ॥३४॥

दरिद्रान्तस्यासार्वधातुके लोपः स्यात् । दरिद्र्यते नानिट् सनि । दिदरिद्रास ॥३४॥

७१४) व्रश्चिमस्ज्योर्धुटि ॥३५॥

व्रश्चिमस्ज्योरन्तस्य धुटि लोपः स्यात् । व्रष्ट्रा । मङक्ष्यति । धुटि किम् ? मज्ज्यते ॥३५॥

७१५) यन्योकारस्य ॥३६॥

धातोरोकारस्य यनि लोपः स्यात् । द्यति ॥३६॥

७१६) आकारस्योसि ॥३७॥

धातोराकारस्य उसि लोपः स्यात् । अयुः ॥३७॥

७१७) सन्ध्यक्षरे च ॥३८॥

धातोराकारस्य सन्ध्यक्षरे लोपः स्यात् । व्यतिरे ॥३८॥

७१८) अस्तेः सौ ॥३९॥

अस्तेरन्तस्य सौ लोपः स्यात् । असि । हस्त्वेति । व्यतिहे ॥३९॥

७१९) असन्ध्यक्षरयोरस्य तौ तल्लोपश्च ॥४०॥

अकारसन्ध्यक्षरयोः परयोरकारस्य तौ वर्णौ स्तः । तयोश्च निमित्तयोर्लोपः । पच्यन्ते । पचे ॥४०॥

७२०) दीधीवेव्योरिवर्णयकारयोः ॥४१॥

एतयोरन्तस्येवर्णयकारयोर्लोपः स्यात् । आदीधिता । आवेव्यते ॥४१॥

७२१) नामिव्यञ्जनान्तादायेरादेः ॥४२॥

नाम्यन्तव्यञ्जनान्तादायेरादेर्लोपः स्यात् । रैयते । विद्वस्ये ॥४२॥

७२२) गमहनजनखनघसामुपधायाः स्वरादावनण्यगुणे ॥४३॥

एषामुपधाया अण्वर्जेऽगुणस्वरादौ लोपः स्यात् । जग्मुः । जघ्नुः । जज्ञे । चख्नुः ।

जक्षुः । अनणि किम् ? अगमः ॥४३॥

७२३) कारितस्यानामिड्विकरणे ॥४४॥

आम्-इट्-विकरणवर्जे प्रत्यये कारितस्य लोपः स्यात् । कार्यते । कारिता । अनामीत्यादि किम् ? कारयामास । कारयिता । कारय ॥४४॥

७२४) यस्यापत्यप्रत्ययस्यास्वरपूर्वस्य यिन्नायिषु ॥४५॥

अस्वरपूर्वस्यापत्यप्रत्ययसम्बन्धिनो यस्य यिन्नायितद्धितस्वरस्त्रीकारेषु लोपः स्यात् । गार्गीयति । गार्गीयते । गार्गीस्यात् । गार्गीयः । आयिनः । गार्ग्यायणः । स्वरपूर्वस्य तु । आत्रेयीयः ॥४५॥

७२५) नलोपश्च ॥४६॥

यिन्नाय्योर्नाम्नोर्नस्य लोप एव स्यात् । विद्वस्य । राजाये ॥४६॥

७२६) व्यञ्जनाद्दिस्योः ॥४७॥

धातोर्व्यञ्जनाद् दिस्योर्लोपः स्यात् । अधोक् । अलेट् । सौदधोर्वा रो विसर्गवत् । अभिनोऽत्रा अजर्घाः ॥४७॥

७२७) यस्यानिनि ॥४८॥

धातोर्व्यञ्जनात् परस्य योऽननि प्रत्यये लोपः स्यात् । जङ्गमिता । यिन्नाय्योर्वा । दृशदिता । आननि किम् ? पापच्यते ॥४८॥

७२८) अस्य च लोपः ॥४९॥

धातोरस्यानिनि लोपः स्यात् । कथय । चिकीर्षिता ॥४९॥

७२९) सिचो धकारे ॥५०॥

धकारे सिचो लोपः स्यात् । अच्योढ्वम् ॥५०॥

७३०) धुटश्च धुटि ॥५१॥

धुटः परस्य सिचो धुटि लोपः स्यात् । अभित्त । धुटि किम् ? अभित्साताम् ॥५१॥

७३१) ह्रस्वाच्चानिटः ॥५२॥

ह्रस्वादनिटः सिचो धुटि लोपः स्यात् । आहत । प्रास्थित । अनिटः किम् ? अवारिष्टाम् ॥५२॥

७३२) इटश्चेटि ॥५३॥

इटः परस्य सिचः ईटि लोपः स्यात् । अलावीः ॥५३॥

७३३) स्कोः संयोगाद्योरन्ते च ॥५४॥

संयोगाद्योः सकयोर्धुट्यन्ते च लोपः स्यात् । आरिप्स्ये । भ्रष्टा । तष्टा । अबाभ्रट् ॥५४॥

७३४) चवर्गस्य किरसवर्णे ॥५५॥

चवर्गस्यासवर्णे धुटि, अन्ते च, कः स्यात् । वक्ता । अनेनेक् । असवर्णे किम् ? उज्झ ॥५५॥

७३५) हो ढः ॥५६॥

हस्य धुट्यन्ते च ढः स्यात् । लेढा अलेट् ॥५६॥

७३६) दादेर्घः ॥५७॥

दादिधातोर्हस्य धुट्यन्ते च घः स्यात् । दोग्धा । अधोक् ॥५७॥

७३७) नहेर्धः ॥५८॥

नहेर्हस्य च धः स्यात् । नद्धा । अनानत् । आहतश्च आच्छ ॥५८॥

७३८) भृजादीनां षः ॥५९॥

भ्रस्जादेरन्तस्य धुट्यन्ते च षः स्यात् । भ्रष्टा । अमार्ट् ॥५९॥

७३९) छशोश्च ॥६०॥

छशोर्धुटयन्ते च षः स्यात् । प्रष्टा । क्रोट् ॥६०॥

७४०) भाषितपुंस्कं पुंवदायौ ॥६१॥

भाषितपुंस्कमायौ पुंवत् स्यात् । ब्राह्मणायते ॥६१॥

७४१) आदातामाथामादेरिः ॥६२॥

अकारात् परस्यातामाथाम् आदिरिः स्यात् । पचेताम् । पचेथाम् ॥६२॥

७४२) आते आथे इति च ॥६३॥

अकारादातेआथेइत्यादेरिः स्यात् । पचेते । पचेथे ॥६३॥

७४३) या शब्दस्य च सप्तम्याः ॥६४॥

अकारात् सप्तम्या या शब्दस्य ईः स्यात् । पचेत् । पचेः ॥६४॥

७४४) याम्युसोरियमियुसौ ॥६५॥

अकाराद् याम्युसोः स्थाने इयमियुसौ स्तः । पचेयम् । पचेयुः ॥६५॥

७४५) शमादीनां दीर्घो यनि ॥६६॥

शमाद्यष्टधातूनां यनि दीर्घः स्यात् । शाम्य । दाम्य । ताम्य । श्राम्य । भ्राम्य । क्षाम्य । क्लाम्य । माद्य ॥६६॥

७४६) ष्ठिवुक्लम्वाचमामनि ॥६७॥

एषामनि दीर्घः स्यात् । ष्ठीव । क्लाम । आचाम ॥६७॥

७४७) क्रमः परस्मै ॥६८॥

क्रमः परस्मैपदेऽनि दीर्घः स्यात् । क्राम ॥६८॥

७४८) गमिष्यमां छः ॥६९॥

एषामनि छः स्यात् । गच्छ । इच्छ । यच्छ ॥६९॥

७४९) पः पिबः ॥७०॥

पिबति ॥७०॥

७५०) घ्रो जिघ्रः ॥७१॥

जिघ्रति ॥७१॥

७५१) ध्मो धमः ॥७२॥

धमति ॥७२॥

७५२) स्थस्तिष्ठ ॥७३॥

तिष्ठति ॥७३॥

७५३) म्नो मनः ॥७४॥

मनति ॥७४॥

७५४) दाणो यच्छः ॥७५॥

यच्छति ॥७५॥

७५५) दृशेः पश्यः ॥७६॥

पश्यति ॥७६॥

७५६) अर्तेऋच्छिः ॥७७॥

ऋच्छति ॥७७।

७५७) सर्तेर्धावः ॥७८॥

वेगेन धावति ॥७८॥

७५८) शदेः शीयः ॥७९॥

शीयते ॥७९॥

७५९) सदेः सीदः ॥८०॥

सीदति । अनि परे इति सर्वत्र । वेतेः त्याद्या न वा डाद्या वा । वेद । विद्म । **ब्रुवः** पंचपंचाहश्च । आह । आहथुः ॥८०॥

७६०) जा जनेर्विकरणे ॥८१॥

जनेर्विकरणे जाः स्यात् । जायते । तनो यण्याद् वा । तायेे । तन्ये ॥८१॥

७६१) ज्ञश्च ॥८२॥

ज्ञो विकरणे जा स्यात् । जाने ॥ ८२॥

७६२) प्वादीनां ह्रस्वः ॥८३॥

प्वादेः (२२) विकरणे ह्रस्वः स्याति । पुनाति । लुनीहि ॥८३॥

७६३) उतो वृद्धिर्व्यञ्जनादौ गुणिनि सार्वाधातुके ॥८४॥

धातोरुतो व्यञ्जनादौ गुणिनि सार्वधातुके वृद्धिः स्यात् । रौति । द्वित्वे न । जुहोति ॥८४॥

७६४) ऊर्णोतेर्गुणः ॥८५॥
ऊर्णो व्यञ्जनादौ गुणिनि सार्वधातुके वा गुणः स्यात् । प्रोर्णोति । प्रोर्णौति ॥८५॥

७६५) ह्यस्तन्यां च ॥८६॥
ऊर्णो व्यञ्जनादौ ह्यस्तन्यां नित्यं गुणः स्यात् । प्रौर्णोत् । प्रौर्णोः ॥८६॥

७६६) तृहेरिड् विकरणात् ॥८७॥
तृहेर्विकरणाद् व्यञ्जनादौ गुणिनि सार्वधातुके इट् स्यात् । तृणेढि । तृणेक्षि ॥८७॥

७६७) ब्रुव ईड् वचनादिः ॥८८॥
ब्रुवो व्यञ्जनादिगुणिनि सार्वधातुके वचनादिरिट् स्यात् । अब्रवीत् ॥८८॥

७६८) अस्तेर्दिस्योः ॥८९॥
अस्तेर्दिस्योरादिरीट् स्यात् । आसीत् । आसीः ॥८९॥

७६९) सिचः ॥९०॥
सिचः परयोर्दिस्योरादिरीट् स्यात् । अकार्षीत् । अकार्षीः ॥९०॥

७७०) रुदादिभ्यश्च ॥९१॥
रुदादिपञ्चभ्यो दिस्योरादिरीट् स्यात् । अरोदीः । अजक्षीः ॥९१॥

७७१) अदोऽट् ॥९२॥
अदो दिस्योरादिरट् स्यात् । आदत् । आदः । रुदादेश्च । अरोदः ॥९२॥

७७२) सस्य सेऽसार्वधातुके तः ॥९३॥
सस्यासार्वधातुके से तः स्यात् । विवत्स ॥९३॥

७७३) अणि वचेरोदुपधायाः ॥९४॥
वच उपधाया अणि ओत् स्याद् । अवोचः ॥९४॥

७७४) अस्यतेः स्थोऽन्तः ॥९५॥
अणि परेऽस्यतेरन्तः स्थः स्यात् । आस्थत् ॥९५॥

७७५) पतेः पप्तिः ॥९६॥
पतेरणि पप्तिः स्यात् । अपप्तः ॥९६॥

७७६) कृपे रो लः ॥९७॥
कृपे रस्य लः स्यात् । कल्प्ता ॥९७॥

७७७) गिरतेश्चेक्रीयिते ॥९८॥
ग्रोरस्य चेक्रीयिते लः स्यात् । निजेगिल्यते ॥९८॥

७७८) वा स्वरे ॥९९॥
ग्रोरस्य स्वरे लो वा स्यात् । गिर । गिल । अयावुपसर्गस्य । पलाये ॥९९॥

७७९) तृतीयादेर्घढधभान्तस्य धातोरादिचतुर्थत्वं सध्वोः ॥१००॥
धातोस्तृतीयादेर्घढधभान्तस्यावयवस्य सध्वे चादिचतुर्थत्वं स्यात् । दुधुक्ष । अधूढ्वम् ॥१००॥

७८०) लोपे च दिस्योः ॥१०१॥
धातोस्तृतीयादे र्घढधभान्तस्यावयवस्य दिस्यो र्लोपे आदिचतुर्थत्वं स्यात् । अधोक् । अबोभोत् ॥१०१॥

७८१) तथोश्च दधातेः ॥१०२॥
धन्तस्य धस्तथोः सध्वोश्चादि चतुर्थत्वं स्यात् । धत्तः । धत्थः । धत्से । धद्वे । धन्तस्य किम् ? दधाति ॥१०२॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ
(तृतीयाध्याये आख्याते) षष्ठः पादः ॥

(अथ सप्तमः पादः।)

७८२) इडागमोऽसार्वधातुकस्यादिर्व्यञ्जनादेरयकारादेः ॥१॥
धातो परस्य व्यञ्जनादेरयकारादेरसार्वधातुकस्यादिरिडागमः स्यात् । भविता । अयकारादेः किम् ? सूयात् ॥१॥

७८३) स्नुक्रमिभ्यां परस्मै ॥२॥
आभ्यां परस्य परस्मैपदविषये व्यञ्जनादेरयकारादेरसार्वधातुकस्यादिरिट् स्यात् । प्रस्नविष्यति । चिक्रमिष । परस्मै किम् ? प्रचिक्रंसे ॥२॥

७८४) रुदादेः सार्वधातुके ॥३॥
रुदादिभ्यः सार्वधातुकायकारादेर्व्यञ्जनादेरिट्स्यात् । रोदिति । जक्षितः । ये तु, रुद्याः ॥३॥

७८५) ईशः से ॥४॥
ईशः सादौ सार्वधातुके आदिरिट् स्यात् । ईशिष्व ॥४॥

७८६) ईडजनोः सध्वे च ॥५॥
ईड्जनोः सार्वधातुके सध्वे आदिरिट् स्यात् । ईडिषे । ईडिध्वम् । व्यतिजज्ञि । ईशश्च । ईशिध्वे ॥५॥

७८७) से गमः परस्मै ॥६॥
परस्मैपदविषयाद् गमेः से आदिरिट् स्यात् । गमिष्यति । जिगमिषुः । परस्मै किम् ? गम्यते ॥६॥

७८८) हनृदन्तात् स्ये ॥७॥
हन्ऋदन्ताच्च धातोः स्ये आदिरिट् स्पात् । हनिष्यति । करिष्ये ॥७॥

७८९) अञ्जेः सिचि ॥८॥

अञ्जेः सिचि आदिरिट् स्यात् । आञ्जीत् ॥८॥

७९०) स्तुसुधूञ्भ्यः परस्मै ॥९॥

एभ्यः परस्मैपदे सिचीट् स्यात् । प्रास्तावीः । प्रासावीः । प्राधाविषुः । परस्मै किम् ? प्रास्तोष्ट ॥९॥

७९१) यमिरमिनम्यादन्तानां सिरन्तश्च ॥१०॥

एषां परस्मैपदे सिचीट् स्यात् । सोऽन्तश्च । अयंसीत् । व्यरंसीः । अनंसिष्टम् । अयासिषुः ॥१०॥

७९२) स्मिङ्पूङ्रञ्ज्वशूकृगृदृधृप्रच्छां सनि ॥११॥

एषां सनीट् स्यात् । सिस्मयिषते । पिपविषे । अरिरिषे । अञ्जिजिषे । अशिशिषे । क्राद्यासु दादौ । चिकरिषे । जिगरिषुः । आदिदरिषे । दिधरिषे । पिपृच्छिष ॥११॥

७९३) इटो दीर्घो ग्रहेरपरोक्षायाम् ॥१२॥

ग्रहोऽपरोक्षायामिटो दीर्घः स्यात् । ग्रहीता । परोक्षायाम्, जगृहिव । ऋद्वृङ्वृञामपरोक्षाशीः परस्मै सिचि वा । तितरीषति । तरिषे । अवरीष्ट । अवरिष्ट । पावरिता । प्रावरीता । अपरोक्षेत्यादि किम् ? तरिथ । वरिषीष्ट प्रावरिषुः ॥१२॥

७९४) अनिडेकस्वरादातः ॥१३॥

एकस्वरादादन्तधातोरसार्वधातुकमनिट् स्यात् । दाता । वृत्पञ्चकात् स्य सन् श्वस्तन्यात्मने । वर्त्स्यति । विवृत्स । कल्प्तासि ॥१३॥

७९५) इवर्णादश्विश्रिडीङ्शीङः ॥१४॥

श्विश्रिडीङ्शीङ्वर्जादेकस्वरादिवर्णान्तादसार्वधातुकमनिट् स्यात् । चेता । नेता । अश्वादि किम् ? श्वयिता ॥१४॥

७९६) उतोऽयुरुणुस्नुक्षुक्ष्नुवः ॥१५॥

य्वादिवर्जादेकस्वरादुदन्तादसार्वधातुकमनिट् स्यात् । स्तोता । अय्वादि किम् ? यविता ॥१५॥

७९७) ऋतोऽवृङ्वृञः ॥१६॥

वृङ्वृञ्वर्जादेकस्वराददन्तादसार्व धातुकमनिट् स्यात् । कर्ता । अवृङ्वृञः किम् ? वरिता । प्रावरिता ॥१६॥

७९८) शकेः कात् ॥१७॥

कान्ताच्छकेरसार्वधातुकमनिट् स्यात् । शक्ता ॥१७॥

७९९) पचिवचिसिचिरिचिमुचेश्चात् ॥१८॥

चान्ताः पञ्चानिटः । पक्ता ॥१९॥

८००) प्रच्छेश्छात् ॥१९॥

प्रष्टा ॥१९॥

८०१) युजिरुजिरञ्जिभुजिभजिभञ्जिसञ्जित्यजिभ्रस्जि यजिमस्जिसृजिनिजिविजि-स्वञ्जेर्जात् ॥२०॥

जान्ताः पञ्चदशानिष्टः स्युः । योक्ता ॥२०॥

८०२) अदितुदिनुदिक्षुदिस्विद्यतिविद्यतिविन्दतिविनत्तिछिदिभिदिहदिशदिसदि पदि-स्कन्दिखिदेर्दात् ॥२१॥

दान्ताः षोडशानिटः । अत्ता ॥२१॥

८०३) राधिरुधिक्रुधिक्षुधिबन्धिशुधिसिध्यतिबुध्यतियुधिव्यधिसाधेर्धात् ॥२२॥

धान्ता एकादशानिटः ।राद्धा ॥२२॥

८०४) हनिमन्यतेनति् ॥२३॥

नान्तौ द्वावनिटौ ॥ हन्ता । मन्ता ॥२३॥

८०५) आपितपितिपिस्वपिवपिशपिछुपिक्षिपिलिपिलुपिसृपेः पात् ॥२४॥

पान्ता एकादशानिटः । आप्ता ॥२४॥

८०६) जभिरभिलभिभ्यो भात् ॥२५॥

भान्ता स्त्रयोऽनिटः । जब्धा ॥२५॥

८०७) यमिरमिनमिगमेर्मात् ॥२६॥

मान्ताश्चत्वारोऽनिटः ॥ यन्ता ॥२६॥

८०८) रिशिरुशिक्रुशिलिशिविशिदिशिदृशिस्पृशिमृशिदंशेर्शात् ॥२७॥

शान्ता दशानिटः । रेष्टा ॥२७॥

८०९) त्विषिपुष्यतिकृषिश्लिष्यतिद्विषिपिषिविषिशिषिशुषितुषिदुषेः षात् ॥२८॥

षान्ता एकादशानिटः । त्वेष्टा ॥२८॥

८१०) वसतिघसेः सात् ॥२९॥

सान्तौ द्वावनिटौ वस्ता । घस्ता ॥२९॥

८११) दहिदिहिदुहिमिहिरिहिरुहिलिहिलुहिनहिवहेर्हात् ॥३०॥

हान्ता दशानिटः । दग्धा । रिहिलिही सौत्रौ ॥३०॥

८१२) ग्रहगुहोः सनि ॥३१॥

एतयोः सनीट् न स्यात् । जिघृक्ष । जुघुक्षुः ॥३१॥

८१३) उवर्णान्ताच्च ॥३२॥

उवर्णान्तात् सनीट् न स्यात् । पुपूष । बुभूष ॥३२॥

८१४) इवन्तर्धभ्रस्जदम्भुश्रियूर्णुभरज्ञपिसनितनिपति दरिद्रां वा ॥३३॥

एषां सनीट् वा स्यात् । दिदेविष । दुद्यूष । अर्दिधिष । ईत्स । बिभ्रजिष । बिभ्रक्ष

दिदम्भिष । धीप्स । शिश्रयिष । शिश्रीष । यियविष । युयूष । प्रोर्णुनविष । बिभरिष । बुभूर्ष । जिज्ञपयिष । ज्ञीप्स । सिषणिष । सिषांसति । तनिष । तितांस । पिपतिष । पित्स । दिदरिद्रिष । दिदरिद्रास । वृऋतामात्मने सिजाशिषोश्च । प्रावरिष । प्रावुवूर्ष । अवरिष्ट । अतृत । तरिषीष्ट । तीर्षीष्ट ॥३३॥

८१५) **भुवः सिज्लुकि ॥३४॥**

सिज्लुकि भुवो नेट् स्यात् । अभूत् ॥३४॥

८१६) **सृवृभृस्नुद्रुस्रुश्रुव एव परोक्षायाम् ॥३५॥**

परोक्षायामेभ्य एव धातुभ्यो नेट् स्यात् । ससृव । ववृषे । ववृमहे । इत्यादि । एभ्य एव किम् ? पेचिव ॥३५॥

८१७) **थल्यृकारात् ॥३६॥**

ऋकारान्तात् थलि नेट् स्यात् । जहर्थ । थलि किम् ? जह्रिव । अत्वदृश्सृज्स्वरान्तानां नित्यानिटां वा । पेचिथ । पपक्थ । ययिथ । ययाथ । ऋवृव्येदां नित्यम् । आरिथ । आदिथ ॥३६॥

८१८) **कृञोऽसुटः ॥३७॥**

असुटः कृञः परोक्षाथलोर्नेट् स्यात् । चकृव । चकर्थ । असुट् किम् ? सञ्चस्करिव । सञ्चस्करिथ ॥३७॥

८१९) **सूड् भूषणे सम्पर्युपात् ॥३८॥**

सम्पर्युपात् परस्य कृञो भूषणेऽर्थे सुडादिः स्यात् । संस्कर्ता । पर्यस्कार्षीः । उपचस्क्रे ॥३८॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ

(तृतीयाध्याये आख्याते) सप्तमः पादः ॥

(अथाष्टमः पादः ।)

८२०) **पदान्ते धुटां प्रथमः ॥१॥**

धुटां पदान्ते प्रथमः स्यात् । तन्नाम । अलेट् ॥१॥

८२१) **रसकारयोर्विसृष्टः ॥२॥**

रसयोः पदान्ते विसृष्टः स्यात् । अबिभः । यातः ॥२॥

८२२) **घढधभेभ्यस्तथोर्धोऽधः ॥३॥**

धावर्जं घढधभान्तधातुभ्यस्तथोर्धः स्यात् । अदुग्ध । अलीढ । अबुद्धाः । अलब्धाः । अधः किम् ? धतः ॥३॥

८२३) **षढोः कः से ॥४॥**

षढोः से कः स्यात् । पेक्ष्यति । लेक्ष्ये ॥४॥

८२४) **तवर्गस्य षटवर्गाद् टवर्गः ॥५॥**

षाट् टवर्गाच्च तवर्गस्य टवर्गः स्यात् । वपुष्टा । द्वेष्टि । लीढः ॥५॥

८२५) ढे ढलोपो दीर्घश्चोपधायाः ॥६॥

ढस्य ढे लोप उपधायाश्च दीर्घः स्यात् । मूढः । लेढा ॥६॥

८२६) सहिवहोरोदवर्णस्य ॥७॥

सहिवहोर्ढस्य ढे लोपोऽवर्णस्यौच्च स्यात् । सोढा । उदवोढम् ॥७॥

८२७) धुटां तृतीयश्चतुर्थेषु ॥८॥

धुटां चतुर्थेषु तृतीयः स्यात् । दग्धः ॥८॥

८२८) अघोषेष्वशिटां प्रथमः ॥९॥

अशिटां धुटामघोषे प्रथमः स्यात् । धोक्षि । अशिटां किम् ? अस्ति ॥९॥

८२९) भृजः स्वरात् स्वरे द्विः ॥१०॥

भृजः स्वरात् परस्य जस्य स्वरे द्विः स्यात् । बभृज्जे ॥१०॥

८३०) अस्य वमोर्दीर्घः ॥११॥

अस्य वमाद्योः परयोर्दीर्घः स्यात् । पचावः । दीव्यामः ॥११॥

८३१) स्वरान्तानां सनि ॥१२॥

स्वरान्तानां सनि दीर्घः स्यात् । चिचीष ॥१२॥

८३२) हनिङ्गमोरुपधायाः ॥१३॥

हनइङ् गमश्चोपधायाः सनि दीर्घः स्यात् । जिघांस । अधिजिगांसे । तनो वा । तितांस । तितंस । इङ्गमः किम् ? सञ्जिगंसे ॥१३॥

८३३) नामिनो र्वोरकुर्छुरोर्व्यञ्जने ॥१४॥

अकुर्छुरोर्धातो रवोरुपधानामिनो व्यञ्जने दीर्घः स्यात् । बुभूर्ष । कूर्द । दीव्य । अकुर्छुरोः किम् ? कुर्याः । छुर्यते । नाभ्यासे । विव्युः ॥१४॥

८३४) सस्य ह्यस्तन्यां दौ तः ॥१५॥

धातोः सस्य ह्यस्तन्यां दौ तः स्यात् । अचकात् । सौ वा । अचकात्त्वम् । अचकास्त्वम् ॥१५॥

८३५) अड् धात्वादिर्ह्यस्तन्यद्यतनी क्रियातिपतिषु ॥१६॥

आसु विभक्तिषु धातोरादिरड् स्यात् । अभवः । अभूः । अदास्यत् ॥१६॥

८३६) स्वरादीनां वृद्धिरादेः ॥१७॥

आसु विभक्तिषु स्वरादिधातोरादेः स्वरस्य वृद्धिः स्यात् । आयत् । ऐधिष्ट । औहिष्यत ॥१७॥

८३७) अवर्णस्याकारः ॥१८॥

स्वरादिधातोरादेरस्य ह्यस्तन्यादिषु आकारः स्यात् । आटत् । आटीत् । आटिष्यत् ॥१८॥

८३८) अस्तेः ॥१९॥

अस्तेरस्य ह्यस्तन्यामाकारः स्यात् । आस्ताम् ॥१९॥

८३९) एतेर्ये ॥२०॥

ह्यस्तन्यनि एतेर्ये परे अटो दीर्घः स्यात् । आयन् । अध्यायन् ॥२०॥

८४०) न मामास्मयोगे ॥२१॥

मा योगे मास्मयोगे चाडाद्या न स्युः । मा त्वं करोः । मा स्म कार्षीः ॥२१॥

८४१) नाम्यन्ताद् धातोराशीरद्यतनीपरोक्षासु धो ढः ॥२२॥

नाम्यन्तधातोराशिषादिषु धस्य ढः स्यात् । चेषीढ्वम् । अकृढ्वम् । चकृढ्वे ॥२२॥

८४२) मर्जो मार्जिः ॥२३॥

मर्ज इत्यस्य मार्जिः स्यात् । मार्ष्टा । अमार्ट् । गुणे स्वरे वा । मार्जन्ति । मृजन्ति ॥२३॥

८४३) धात्वादेः षः सः ॥२४॥

धातोरादेः षस्य सः स्यात् । सिञ्च । न ष्ट्वैष्ठिव्-ष्ठक्वाम् । ष्टयायति ॥२४॥

८४४) णोनः ॥२५॥

धातोरादेर्णस्य नः स्यात् । नय ॥२५॥

८४५) नमित्तात् प्रत्ययविकारागमस्थः सः षत्वम् ॥२६॥

निमित्तान्नामिकरात् प्रत्यय विकारागमस्थः सः षत्वमाप्नोति । चिचीष । धनुष्य । शक्ष्यति । चिकीर्ष । सिषेव । परिष्कुरु ॥२६॥

८४६) शासिवसिघसीनां च ॥२७॥

निमित्तात् शासादीनां सः षत्वमाप्नोति । शिष्ये । उष्यते । जक्षुः ॥२७॥

८४७) स्तौतीनन्तयोरेव षणि ॥२८॥

निमित्तात् परः प्रत्ययादिस्थः स्तोतीनन्तयोरेव सः षत्वभूते सनि षत्वमाप्नोति । तुष्टुषा । सिषेवयिष । एव किम् ? सुसूष । षणि किम् ? तिष्ठास । स्विस्वदिसहाम् । सिस्वेदयिष ॥२८॥

८४८) लुग्लोपे न प्रत्ययकृतम् ॥२९॥

लुका लोपे सति प्रत्यये परे उक्तं कार्यं प्रकृतेर्न स्यात् । पञ्च । दुग्धे । प्रत्यये किम् ? अस्थुः ॥२९॥

८४९) स्वरविधिः स्वरे द्विर्वचननिमित्ते कृते द्वर्वचने ॥३०॥

द्विर्वचननिमित्ते स्वरादिप्रत्यये परे द्विर्वचने कृते सति पश्चात् स्वरविधिः स्यात् । पपुः । आटिटः । निन्युः । स्वरविधिः किम् ? असूषुपः । स्वरे किम् ? देध्मीये ॥३०॥

८५०) योऽनुबन्धोऽप्रयोगी ॥३१॥

धातोः प्रत्ययस्य च योऽनुबन्धः सोऽप्रयोगी । इङ् सन् ॥३१॥

८५१) शिडिति शादयः ॥३२॥

शषसहाः शिटः स्युः ॥३२॥

८५२) सम्प्रसारण य्वृतोऽन्तःस्थानिमित्ताः ॥३३॥

अन्तःस्थानिमित्ता इउऋवर्णाः सम्प्रसारणं स्युः ॥३३॥

८५३) अर् पूर्वे द्वे सन्ध्यक्षरे (च) गुणः ॥३४॥

अर् एओ अपेक्ष्य पूर्वे द्वे सन्ध्यक्षरे गुणः स्यात् । आर् । ए । ओ ॥३४॥

८५४) आरुत्तरे च वृद्धिः ॥३५॥

आर् उत्तरे द्वे सन्ध्यक्षरे वृद्धिः स्यात् । आर् । ऐ । औ ॥३५॥

इति श्रीमेरुतुङ्गसूरिविरचितायां (कातन्त्र-) बालावबोधवृत्तौ

(तृतीयाध्याये आख्याते) अष्टमः पादः ॥

॥ इत्याख्यातं समाप्तम् । इति तृतीयोऽध्यायः॥

अथ चतुर्थोऽध्यायः कृतः ॥

अर्हम् ॥

कात्यायनेन ये पूर्वं विस्तरेण कृतः कृताः ।
ते संक्षिप्याभिधीयन्ते बालानामवबुद्धये ॥१॥

(अथ प्रथमः पादः ।)

८५५) सिद्धिर्लोकात् ॥१॥

कृदन्तैः समासासमासविभाषादिसिद्धिर्लोकाद् व्याकरणादेर्ज्ञेया ॥१॥

८५६) ञ्णितीज्वत् ॥२॥

ञनुबन्धे णानुबन्धे च कृत्प्रत्यये धातोरिचीव कार्यस्य सिद्धिः स्यात् । पाठः । कारकः । घातः । जनकः । वधः । उत्कोटकः । पायकः । घटंघटम् । घाटंघाटम् ॥२॥

८५७) हन्तेस्तः ॥३॥

हन्तेर्नस्य ञ्णिति कृत्प्रत्यये तः स्यात् । घातः । घातकः ॥३॥

८५८) न सेटोऽमन्तस्यावमिकमिचमामिचि ॥४॥

सेटोऽमन्तधातोर्वमादिवर्जस्येचि कृतं कार्यं न स्यात् । अशमि । ञ्णितीज्वद् भावात् । शमः । तमी । सेटः किम् ? अयामि । यामः । अवमीत्यादि किम् ? अवामि । वामः । अकामि । कामः । आचामि । आचामः ॥४॥

८५९) प्रत्ययैकदेशलुकां चानाम् ॥५॥

प्रत्यये एकदेशस्य लुग् येषां तेषां धातूनामनां नलोपवर्जानां तत्रैव श्रुते प्रत्यये यत् प्राप्तं तन्न स्यात् । समिधिता । अदृशदि । दृशदकः । वेच्यः । लोलुवः । अनां किम् ? एधः ॥५॥

८६०) सार्वधातुकवच्छिति ॥६॥

शानुबन्धे कृति सार्वधातुक इव कार्यं स्यात् । जुह्वत् । कुर्वाणः ॥६॥

८६१) अगुणः क्ङिति ॥७॥

कानुबन्धो ङानुबन्धश्च कृदगुणः स्यात् । कृतः । गृहीत्वा । इष्टिः । बिभ्यत् । सुन्वन् ॥७॥

८६२) गुणी जागुरशन्तृङ्कृत् ॥८॥

जागर्तेः परोऽशन्तृङ् कृद्गुणी स्यात् । जागरकः । जागरितः । अशन्तृङ् किम् ? जाग्रत् ॥८॥

८६३) क्त्वा सेडरुदविदमुखक्षुधक्लिशकुशगुधमृडमृदवदवसग्रहाम् ॥९॥

अरुदादीनां सेट् क्त्वा गुणी स्यात् । शयित्वा । देवित्वा । श्रंसित्वा । सेट् किम् ? कृत्वा । अरुदेत्यादि किम् ? रुदित्वा । विदित्वा । गृहीत्वा ॥९॥

८६४) व्यञ्जनादीदुदुपधानामवो वा ॥१०॥

अवन्तस्येकारोकारोपधस्य व्यञ्जनादिधातोः सेट् क्त्वा गुणी वा स्यात् । लिखित्वा । लेखित्वा । द्युतित्वा । द्योतित्वा । अवः किम् ? देवित्वा । सन् च । लिलिखिष । लिलेखिष ॥१०॥

८६५) तृषिमृषिकृशिवञ्चिलुञ्चाम् ॥११॥

एषां सेट् क्त्वा गुणी वा स्यात् । तृषित्वा । तर्षित्वा । लुचित्वा । लुञ्चित्वा ॥११॥

८६६) थफां न्युपान्ते ॥१२॥

थान्तफान्तानां नि उपान्त्ये सति सेट् क्त्वा गुणी वा स्यात् । ग्रथित्वा । ग्रन्थित्वा । गुफित्वा । गुम्फित्वा । न्युपान्ते किम् ? कोथित्वा ॥१२॥

८६७) जान्तनशामनिटां वा तादिः ॥१३॥

अनिटां जान्तनशां न्युपान्ते तादिः क्त्वा गुणी वा स्यात् । भक्त्वा । भङ्क्त्वा । नष्ट्वा । नंष्ट्वा । अनिटां किम् ? अञ्जित्वा । तादिः किम् ? विभज्य ॥१३॥

८६८) स्कन्दस्यन्दोः ॥१४॥

अनयोस्तादिः क्त्वा गुणी स्यात् । स्कन्तवा । स्यन्त्वा । तादिः किम् ? प्रस्कद्य ॥१४॥

८६९) डी ङशीङ्पूङ्धृषिक्ष्विदिस्विदिमिदो निष्ठा सेट् ॥१५॥

एषां सेट् निष्ठा गुणी स्यात् । डयितः । शयितवान् । प्रमेदितः । सेट् किम् ? डीनः ॥१५॥

८७०) मृषः क्षान्तौ ॥१६॥

क्षान्तौ वर्तमानान्मृषः सेट् निष्ठा गुणी स्यात् । मर्षितः । क्षान्तौ किम् ? अपमृषितं वाक्यम् ॥१६॥

८७१) भावारम्भयोर्वोदुपधाद् गुण्यनः ॥१७॥

गुण्यन्विकरणार्हादुकारोपधधातोर्भावारम्भयोः सेट् निष्ठा गुणी वा स्यात् । द्योतितम् । द्युतितं, तमः । प्ररुदितः । प्ररोदितः । गुण्यनः किम् ? निगुधितम् ॥१७॥

८७२) ह्लादो ह्रस्वः क्तौ च ॥१८॥

ह्लादः क्तौ निष्ठायां च ह्रस्वः स्यात् । ह्लतिः । ह्लन्तः । ह्लन्नवान् ॥१८॥

८७३) खिदन्तेऽनव्ययस्वरस्यमोऽन्तश्च ॥१९॥

अनव्ययस्वरान्तोपपदस्यखानुबन्धप्रत्ययान्ते धातोर्मोऽन्तः सम्भवे ह्रस्वः स्यात् । तीर्थङ्करः । ग्रामणिंमन्यः । कालिंमन्या । वधुंमन्या । झंमन्यः । अनव्ययस्य किम् ? दोषामन्यमहः ॥१९॥

८७४) नाम्येकस्वरस्य द्वितीयाम् ॥२०॥

अनव्ययं नाम्यैकस्वरोपपदस्य खानुबन्धप्रत्ययान्ते धातौ द्वितीयाम् स्यात् । श्रियंमन्यः । गांमन्यः । एकस्वरस्य किम् ? सेनानिंमन्यः ॥२०॥

८७५) ह्रस्वस्य तः पित्कृति ॥२१॥

ह्रस्वान्तधातोः पानुबन्धकृति तोऽन्तः स्यात् । अग्निचित् । प्रकृत्य ॥२१॥

८७६) ओदौद्भ्यां यः स्वरवत् ॥२२॥

ओकारौकाराभ्यां कृद् यः स्वरवत् स्यात् । लव्यम् । अवश्यलाव्यम् । कृद्यः किम् । उपोयते ॥२२॥

८७७) वेर्लोपः ॥२३॥

कृतो वेर्लोपः स्यात् । गीः । क्विप् । अर्धभाक् । विंण् । सोमपाः । विच् । च्वेश्च । पटूकुरु ॥२३॥

८७८) य्वोर्व्यञ्जनेऽये ॥२४॥

यवयोर्यवर्जकृद्व्यञ्जने लोपः स्यात् । क्नूतः । दिदिवान् । लोलूः । त्यादौ च । पापहि । अये किम् ? प्रक्नूय्य । प्रदीव्य ॥२४॥

८७९) निष्ठेटीनः ॥२५॥

निष्ठायामिटि परे इनो लोपः स्यात् । कारितः । चारितवान् । निष्ठायां किम् ? कारयिता ॥२५॥

८८०) लघुपूर्वो यप्यय् ॥२६॥

लघुपूर्व इन् यपि अय् स्यात् । प्रशमय्य । विगणय्य । आल्वादिषु । स्पृहयालुः । स्तनयित्नुः । आप्नोतेर्वा । प्रापय्य । प्राप्य ॥२६॥

८८१) मीग्मिग्दीङ्दामानामाः ॥२७॥

मीग्-मिग्-दीङां दामागायत्यादीनां यपि परे आःस्यात् । प्रमाय । परिमाय । प्रदाय ईत्त्वबाधार्थम् । आदाय । विधाय । प्रमाय । प्रगाय । प्रपाय । प्रस्थाय । अवसाय । विहाय ॥२७॥

८८२) क्षेः क्षीः ॥२८॥

क्षेर्यपि क्षीः स्यात् । प्रक्षीय ॥२८॥

८८३) निष्ठायां न वा (ऽऽक्रोशदौन्ययोः ॥२९॥

क्षितायुः । क्षीणायुः । क्षितकः । क्षीणकः) ॥२९॥

८८४) स्फायः स्फीः ॥३०॥
निष्ठायां स्फायः स्फीर्वा स्यात् । स्फीतः । स्फीतवान् ॥३०॥

८८५) प्रस्त्यः सम्प्रसारणम् ॥३१॥
प्रात् स्त्यायतेर्निष्ठायां सम्प्रसारणं स्यात् । प्रस्तीतः ॥

८८६) न वेञ्ज्योर्यपि ॥३२॥
अनयोर्यपि सम्प्रसारणं न स्यात् । प्रवाय । प्रज्याय ॥३२॥

८८७) व्यश्च ॥३३॥
व्येञो यपि सम्प्रसारणं न स्यात् । प्रव्याय ॥३३॥

८८८) संपरिभ्यां वा ॥३४॥
संव्याय । परिवीय ॥३४॥

८८९) तद्दीर्घमवोऽन्त्यम् ॥३५॥
वेञ्वर्जस्य तत् सम्प्रसारणमन्त्यं दीर्घं स्यात् । मित्रहूः । हूतः । अवः किम् ? उतः । अन्त्यं किम् ? सुप्तः ॥३५॥

८९०) अहन् सत्पञ्चमस्य क्वागुणधुटोः ॥३६॥
हनवर्जं सत् पञ्चमान्तोपधायाः क्वावगुणे धुटि च दीर्घः स्यात् । प्रशान् । शान्तः । शंशान्तः । शान्त्वा । अहन् किम् ? वृत्रहणि । सत्पञ्चमस्य किम् ? गतः । घृतः । अगुणधुटि किम् ? गन्ता । प्रणम्य । क्रमे वा क्त्वि । क्रान्त्वा । क्रन्त्वा ॥३६॥

८९१) छवोः शूटौ पञ्चमे च ॥३७॥
छवयो क्वावगुणिधुटि पञ्चमे च क्रमेण श्-ऊटौ स्याताम् । शब्दप्राशौ । पृष्टः । प्रश्नः । अक्षः । द्यूः । द्यूत्वा । दुद्यूष । स्योमा ॥३७॥

८९२) श्रिव्यव्यादेः सस्वरः ॥३८॥
श्रूः । ऊतः ॥३८॥

८९३) राल्लोप्यौ ॥३९॥
रेफात् छवौ क्वावगुणिधुटि पञ्चमे च लोप्यौ स्याताम् । मुरौ । मूर्तः । मोर्मा । धूः । धूर्त्तिः । तोर्मा ॥३९॥

८९४) वनतितन्वादिनिषिद्धेटां धुट्यगुणे पञ्चमः ॥४०॥
वनतेस्तन्वादिनिषिद्धेटश्चागुणे धुटि पञ्चमो लोप्यः स्यात् । वतिः । ततः । हत्वा ॥४०॥

८९५) यपि ॥४१॥
एषां यपि पञ्चमो लोप्यः स्यात् । प्रवत्य । प्रतत्य । मो वा । आगत्य । आगम्य । घञां धेः । एधः ॥४१॥

८९६) विड्वनोरा: ।।४२।।
अनयो: पञ्चम आ: स्यात् । अब्जा: । अवावा । ध्वावा ।।४२।।

८९७) धुटिखनिसनिजनाम् ।।४३।।
एषां पञ्चमस्य धुटि आ स्यात् । खात: । सात: । जाति: । सनि च । सिषास ।।४३।।

८९८) ये वा ।।४४।।
खाये । खन्ये । चाखाये । चंखन्ये । प्रसाय । प्रसन्य । जायते । जन्यते ।।४४।।

८९९) इञहातेस्तादौ क्त्वि ।।४५।।
जहातेस्तादौ क्त्वि इत् स्यात् । हित्वा । तादौ किम् ? प्रहाय । जहाते: किम् ? हात्वा ।।४५।।

९००) दोसोमास्थामगुणे ।।४६।।
एषामगुणे तादौ इत् स्यात् । दित: । अवसित: । मित्वा । स्थिति: ।।४७।।

९०१) वा छाशो: ।।४८।।
छात: । छित: । शाति: । शिति: ।।४८।।

९०२) धागो हि: ।।४९।।
धागस्तादावगुणे हि: स्यात् । हित: । हित्वा ।।४९।।

९०३) चरफलोरस्योत् ।।५०।।
अनयोरस्य तादावगुणे उत् स्यात् । चूर्ति: । प्रफुल्त: ।।५०।।

९०४) दद्बोऽध: ।।५१।।
दासंज्ञस्याधेटस्तादावगुणे दत् स्यात् । दत्ति: । अध: किम् ? धीत: ।।५१।।

९०५) उपसर्गस्वरात: ।।५२।।
उपसर्गस्वराद् दासंज्ञस्याधेटस्तादावगुणे त: स्यात् । प्रत्तम् । नीत्तम् ।।५२।।

९०६) यपि चादो जग्ध: ।।५३।।
तादावगुणे यपि चादो जग्ध: स्यात् । जग्ध: । प्रजध्य ।।५३।।

९०७) क्त्वातुममन्तोऽव्ययम् ।।५४।।
क्तवातुममन्तोऽसंख्येयत्वादव्ययं स्यात् ।।५४।।

९०८) अनुबन्धइत् ।।५५।।
कृत्सूत्रे अनुबन्ध इत् स्यात् ।।५५।।

इति श्रीमदञ्चलगच्छेश्वरश्रीमेरुतुङ्गसूरिविरचितयो: कृत्सूत्रवृत्त्यो:
(चतुर्थाध्याये) प्रथम: पाद: ।।

(अथ द्वितीयः पादः ।)

९०९) कृत् ।।१।।

अत्र वक्ष्यमाणः प्रत्ययः कृत्संज्ञः स्यात् ।।१।।

९१०) कर्तरि ।।२।।

विशेषोक्तिं विना कृत् कर्तरि स्यात् । कर्ता । घुरकेलिमौ कर्मकर्तरि । भङ्गुरः । पचेलिमाः माषाः ।।२।।

९११) श्लिषशीङ्स्थासवसजनरुहजृभजः क्तौ वा ।।३।।

एषां कर्तरि क्तो वा स्यात् । अश्लिष्टाः कान्तां ते । आश्लिष्टा कान्ता तैः । अतिशयितो गुरुं शिष्यः । अतिशयितो गुरुस्तैः । विभक्ताः स्वं ते । विभक्तं स्वं तैः ।।३।।

९१२) आरम्भे ।।४।।

आरम्भार्थे विहितः क्तः कर्तरि वा स्यात् । प्रकृताः कटं ते । प्रकृतः । कटस्तैः ।।४।।

९१३) वागत्यर्थकर्मकपिबभुजाम् ।।५।।

एषां क्तः कर्तरि वा स्यात् । गतोऽसौ ग्रामम् । गतोऽसौ तैः । स्थितोऽसौ । स्थितं तैः । पीताः पयः । पीतं पयः । भुक्तास्ते । भुक्तं तैः ।।५।।

९१४) क्तवा तुमम् भावे ।।६।।

एते धात्वर्थमात्रे स्युः । कृत्वा । कर्तुम् । कारं कारं याति ।।६।।

९१५) कृत्यक्तखलर्थाः कर्मणि च ।।७।।

एते सकर्मकाद् धातोः कर्मणि, अकर्मकाच्च भावे स्युः । कार्यः, कर्तव्यः कटस्तेन । स्थेयं देयं त्वया । कृतः कटः । कृतं कटं तेन । सुकरः कटः । सुकरं तेन ।।७।।

९१६) भीमादयोऽपादाने ।।८।।

एतेऽपादाने स्युः । भीमः । भयानकः ।।८।।

९१७) सम्प्रदानाच्चान्यत्रोणादयः ।।९।।

सम्प्रदानाद् अपादानाच्चान्यत्र कारके वर्तमानार्थधातुभ्यो बहुलमुणादयः स्युः । कारुः ।।९।।

९१८) अन्यत्रापि कृत् ।।१०।।

यथोद्दिष्टार्थादन्यत्रापि कृत् स्यात् । मोहनीयं कर्म ।।१०।।

९१९) वाऽसरूपोऽस्त्रियाम् ।।११।।

न विद्यते समानं रुपं यस्य । स्त्र्यर्थे विहितं वर्जयित्वा सरूपकृद् वा स्यात् । चेयम् । चेतव्यम् । चयनीयम् । असरुपः किम् ? ध्यणि यो न । कार्यम् । अस्त्रियां किम् ? चिकीर्षा । क्तिर्न ।।११।।

९२०) तव्यानीयौ ।।१२।।

धातोः परौ तव्यानीयौ स्याताम् । स्थातव्यम् । स्थानीयम् ॥१२॥

९२१) स्वराद्य एच्च ॥१३॥

स्वरान्तधातोर्यस्यादातश्च एत् । चेयम् । देयम् ॥१३॥

९२२) शकितकिचतियतिशसिसहियजिभजिपवर्गात् ॥१४॥

एभ्यो यः स्यात् । शक्यम् । तक्यम् । चत्यम् । यत्यम् । शस्यम् । सह्यम् । यज्यम् । भज्यम् । तप्यम् । गम्यम् । नाम्नो वदः क्यप् च । ब्रह्मोद्यम् । ब्रह्मवद्यम् ॥१४॥

९२३) यममदगदचरोऽनुपसर्गे ॥१५॥

एषामुपसर्गाभावे यः स्यात् । यम्यम् । मद्यम् । गद्यम् । चर्यम् । अनुपसर्गात् किम् ? प्रयाम्यम् । अभिचार्यः । आङि च । आचर्यम् ॥१५॥

९२४) वृञ्भृदृशासुस्तुजुषीणां क्यप् ॥१६॥

एषां क्यप् स्यात् । वृत्यम् । भृत्यम् । आदृत्यम् । शिष्यम् । अवश्यस्तुत्यम् । जुष्यम् । इत्यम् ॥१६॥

९२५) ऋदुपान्त्यादकृपः ॥१७॥

कृपवर्जाद् ऋदुपधात् क्यप् स्यात् । वृध्यम् । अकृपः किम् ? कल्प्यम् ॥१७॥

९२६) न वा कृवृषिमृजिदुहिगुहिशंसिजपः ॥१८॥

एभ्यो वा क्यप् स्यात् । कृत्यम् कार्यम् । वृष्यम् । वार्ष्यम् । मृज्यम् । मार्ज्यम् । दुह्यम् । दौह्यम् । गुह्यम् । गौह्यम् । शस्यम् । शास्यम् । जप्यम् । जाप्यम् ॥१८॥

९२७) ऋवर्णव्यञ्जनाद् घ्यण् ॥१९॥

ऋवर्णान्ताद् व्यञ्जनाच्च घ्यण् स्यात् । कार्यम् । शार्ध्यम् । पाक्यम् ॥१९॥

९२८) आसुयुवपिलपित्रपिडिपिदभिचमानमः ॥२०॥

आङ्पूर्वाभ्यां सुञ्नमभ्यां यौत्यादिभ्यश्च घ्यण् स्यात् । आसाव्यम् । याव्यम् । वाप्यम् । दाभ्यम् । आचाम्यम् । आनाम्यम् ॥२०॥

९२९) उवर्णादावश्यके ॥२१॥

अवश्यंभावे द्योत्ये उवर्णान्तधातोर्घ्यण् स्यात् । नाव्यम् । अवश्यलाव्यम् । लव्यमन्यत् ॥२१॥

९३०) कृत्याः ॥२२॥

तव्यानीयक्यप्घ्यण्प्रत्ययाः कृत्यसंज्ञाः स्युः ॥२२॥

९३१) णकाचतृचः ॥२३॥

धातोः कर्तरि एते स्युः । पाचकः । पचः । पक्ता ॥२३॥

९३२) नन्द्यादेरनः ॥२४॥

नन्दनः । शोभनः ॥२४॥

१३३) ग्रहादेर्णिन् ॥२५॥
ग्राही । स्थायी ॥२५॥

१३४) नाम्युपधप्रीकृगृज्ञः कः ॥२६॥
विक्षिपः । प्रियः । किरः । गिरः । ज्ञः ॥२६॥

१३५) उपसर्गादातो डोऽश्यः ॥२७॥
आह्वः । प्रह्वः ॥२७॥

१३६) न वा ज्वलादिदुनीभूग्रहास्त्रोर्णोऽनुपसर्गात् ॥२८॥
एभ्योऽनुपसर्गेभ्यो वा णः स्यात् । ज्वलः । ज्वालः । दवः । दावः । नयः । नायः । भवः । भावः । ग्रहः । ग्राहः । आस्त्रवः आस्त्रावः । नर्तकगाथकगायनीप्रवकादयोऽकट्धकट्नणकाद्यन्ता ज्ञेयाः ॥२८॥

इति श्रीमेरुतुङ्गसूरिविरचितयोः कृत्सूत्रवृत्त्योः (चतुर्थाध्याये) द्वितीयः पादः ।

अथ तृतीयः पादः ।

अर्हम् ॥

१३७) कर्मणोऽण् ॥१॥
कर्मणः पराद् धातोरण् स्यात् । कुम्भकारः । वेदाध्यायः ॥१॥

१३८) मन्याणिन् पुंवच्चात्र ॥२॥
कर्मणः परान्मन्यतेर्णिन् स्यात् । अत्र णिन्नन्ते कर्मणः पुंवत् स्यात् । ज्ञमानी बन्धोः । पटुमानी पत्न्याः । पुंवद्भावात् । खट्वामानिनी ॥२॥

१३९) खश् च स्वस्मै ॥३॥
कर्मणः परादात्मार्थे खश् च स्यात् । विदुषीमात्मानं मन्यते विद्वन्मानिनी । मन्या । ज्ञंमन्यः ॥३॥

१४०) ण-क-टक्-अच्-ट-अ-इ-खि-खश्-ख-ड-णिन्-खनट्-खिष्णु-खुकञ्-विण्-विटो यथोद्देशम् ॥४॥
कर्मणोऽकर्मणः केवलाद् धातोरेते सप्तदशप्रत्यया यशोद्देशं ज्ञेयाः । ण । धर्मशीलः । क । गोदः । टक् । सामगी । सुरापी । अच् । कवचहरः कुमारः । पूजार्हः । चक्रधरः । धनुग्रहः । ट । भिक्षाचरी । अग्रेसरी । यशस्करी विद्या । अ । किङ्करः । इ । फलेग्रहिः । खि । कुक्षिंभरिः । खश् । स्तनन्धयः । असूर्यम्पश्यः । ख । भयङ्करः । ड । भुजगः । गिरिशः । तमोपहः । णिन् । शीर्षघाती । खनट् । प्रियङ्करणः । खिष्णु । विष्णुः । खुकञ् । प्रियम्भावुकः । विण् । श्रीभाक् । विट् । अग्रेगाः ॥४॥

१४१) मन्-वन्-क्वनिप्-विचः ॥५॥
कर्मणोऽकर्मणः केवलाद्वा धातोरेते प्रत्यया यथालक्ष्यं स्युः । मन् । इन्द्रशर्मा । वन् ।

विजावा । क्वनिप् । सुधीवा । विच् । सोमपाः । रिष् । रेट् ॥

९४२) क्विप् ॥६॥

कर्मणोऽकर्मणः केवलाद् वा धातोः क्विप् यथालक्ष्यं स्यात् । क्रव्यात् । उषाश्रुत् । प्रसूः । गीः । लूः । वृत्रहा । ददृजगज्जुहूवाक्प्राट् धीश्रीद्रूस्रू कटप्रूपरिवाट् भ्राजाद्याः क्विपः ॥६॥

९४३) नाम्नः साधौ णिनिः ॥७॥

नाम्नः परात् साध्वर्थात् ॥ धातोर्णिनिः स्यात् । साधुकारी ॥७॥

९४४) अजातेः शीले ॥८॥

जातिवर्जान्नाम्नः पराद् धातोः शीलेऽर्थे णिनिः स्यात् । उष्णभोजी । प्रस्थायी । अजातेः किम् ? शालीन् भोक्ता । शीले किम् ? उष्णभोजो मन्दः ॥८॥

९४५) व्रताभीक्ष्ण्योः ॥९॥

नाम्नः पराद् धातोरनयोर्गम्ययोर्णिनिः स्यात् । अश्राद्धभोजी । क्षीरपायी ॥९॥

९४६) कर्तुरुपमानात् ॥१०॥

कर्त्रोपमानाद् धातोर्णिनिः स्यात् । उष्ट्रक्रोशी ॥१०॥

९४७) कर्मणोऽतीते हनः कुत्सायाम् ॥११॥

कर्मणः परादतीतार्थाद् धातोः कुत्सायां गम्यायां णिनिः स्यात् । पितृघाती ॥११॥

९४८) विक्रिय इन् ॥१२॥

कर्मणः परादतीतार्थाद् विक्रियः कुत्सायामिन् स्यात् । सोमविक्रयी ॥१२॥

९४९) क्वनिप् दृशेः ॥१३॥

कर्मणः परादतीतार्थाद् दृशः क्वनिप् स्यात् । बहुदृश्वा ॥१३॥

९५०) सप्तम्या जनेर्डः ॥१४॥

सप्तम्यन्तनाम्नः परादतीतार्थाज्जनेर्डः स्यात् । जलजम् ॥१४॥

९५१) अजातेः पञ्चम्याः ॥१५॥

पञ्चम्यन्ताजात्यर्थात् परादतीतार्थाज्जनेर्डः स्यात् । बुद्धिजम् । अजातेः किम् ? गजाज्जातः ॥१५॥

९५२) क्वचित् ॥१६॥

उक्तादन्यत्रापि यथालक्ष्यं डः स्यात् । द्विजः । प्रजाः ॥१६॥

९५३) क्तक्तवतू निष्ठा च ॥१७॥

अतीतार्थाद् धातोरेतौ स्यातां, निष्ठासंज्ञौ च । कृतः । कृतवान् ॥१७॥

(इति श्रीमदञ्चलगच्छेश्वर श्रीमेरुतुङ्गसूरिविरचितयोः कृत्सूत्रवृत्याः (चतुर्थाध्याये) तृतीयः पादः ॥)

(अथ चतुर्थः पादेः ।)

९५४) क्वसुकानौ परोक्षावच्च ॥१॥

अतीतार्थाद् धातोः क्वसुकानौ स्याताम् । तौ च परोक्षावत् । पचिवान् । पाचयाञ्चकृवान् । पेचानः ॥१॥

९५५) वर्तमाने शन्तृ निशौ भविष्यति तु सस्यौ ॥२॥

वर्तमानार्थाद् धातोरेतौ स्याताम्, भविष्यदर्थात् तु स्ययुक्तौ । पचन् । पचमानः । यास्यन् । करिष्यमाणः । माङ्याकोशे च । मा पचन् । मा पचमानो मूर्खः ॥२॥

९५६) वेत्तेर्वा क्वन्सुः ॥३॥

वतमानार्थाद् विदः क्वन्सुर्वा स्यात् । तत्त्वं विद्वान् । विदन् वा ॥३॥

९५७) क्वसुशन्तृङौ परस्मै ॥४॥

एतौ प्रत्ययौ परस्मैपदसंज्ञौ स्तः । बभूवान् । भवन् ॥४॥

९५८) अनावात्मने ॥५॥

अत्र क्वन्सादिमध्ये आनौ आत्मनेपदसंज्ञौ स्तः । कुर्वाणः । सर्वेषामात्मने इत्यगुणः । व्यतिबभूवानः ॥५॥

९५९) शक्तिवयःशीले शानङ् ॥६॥

एषु गम्येषु वर्तमानार्थाद् धातोः शानङ् स्यात् । निघ्नानः । स्त्रियं गच्छमानः । निन्दमानः ॥६॥

९६०) आन्मोऽन्त आने ॥७॥

अकारात् पर आनो मान्तः स्यात् । क्रियमाणः । पक्ष्यमाणः ॥७॥

९६१) तृन् शीलधर्मसाधुषु ॥८॥

शीलादिवर्तमानार्थाद् धातोस्तृन् स्यात् । कर्ता कटम् । वधूमूढां मुण्डयितारः । श्राविष्ठायनः । गन्ता खेलः ॥८॥

९६२) इष्णुष्णुक्स्नुक्नुडिरुरुक्आरुआलुइन्उकञ्णकटाकमरक्घुरकुरऊकवरट्वरप्करक्विपो यथोक्तं धातोः ॥९॥

शीलादिवर्तमानार्थेभ्यो यथोक्तधातुभ्य एते एकविंशति प्रत्ययाः स्युः । इष्णु । भविष्णुः । वर्तिष्णुः । ष्णुक् । भूष्णुः । जिष्णुः । स्नु । स्थास्नुः । क्नु । गृध्नुः । डि । सासहिः । चक्रिः । रु । धारुः । रुक् । भीरुः । आरु । वन्दारुः । आलु । दयालुः । इन् । जयी । क्षयी । उकञ् । कामुकः । णक । आक्रोशकः । निन्दकः । टाक । जल्पाकी । मरक् । प्रसृमरः । घुर । भङ्गुरः । कुर । विदुरः । वावदूकः । जागरूकः । वर । भास्वर । पेस्वरः । ट्वरप्क । इत्वरः । जित्वरी । र । स्मेरः । नम्रः । क्विप् । विद्युत् ॥९॥

९६३) इङितो व्यञ्जनाद्यन्तादकर्मकादनः ॥१०॥

व्यञ्जनमादिरन्तश्च यस्य तस्माद् इतो ङितश्च शीलादिवर्तमानार्थादकर्मकाद् धातोरनः

स्यात् । स्पर्धनः । वर्तनः । अकर्मकात् किम् ? वसिता वस्त्रम् ॥१०॥

९६४) भूषा क्रोधार्थज्वालादीनां च ॥११॥

मण्डनः । कोपनः । जवनः । ज्वलनः । चङ्क्रमणः ॥११॥

९६५) शमष्टकाद् घिनण् ॥१२॥

शीलादिवर्तमानार्थेभ्यः शमाद्यष्टधातुभ्यो घिनण् स्यात् । शमी । प्रमादी । क्लमी ॥१२॥

९६६) युजादीनां च ॥१३॥

योगी । भोगी ॥१३॥

९६७) सनन्ताशंसिभिक्षेरुः ॥१४॥

एभ्यः शीलादिवर्तमानार्थेभ्य उः स्यात् । चिकीर्षुः । आशंसुः । भिक्षुः ॥१४॥

९६८) चेक्रीयितस्याचि लुक् ॥१५॥

अस्याचि परे लुक् स्यात् । लोलवः । नोतः । रोरूयः ॥१५॥

९६९) डुइत्रतटो विधिवत् ॥१६॥

एते प्रत्यया वर्तमानार्थधातुभ्यः सूत्रोक्तविधिना स्युः । शम्भुः । प्रभुः । लवित्रम् । नेत्रम् । पात्री ॥१६॥

९७०) ज्ञानेच्छार्चार्थाञीद्भ्यः क्तः ॥१७॥

ज्ञान इच्छार्चार्थेभ्यो ञ्यनुबन्धेभ्यश्च वर्तमानार्थेभ्यः क्तः स्यात् । राज्ञां ज्ञातः । इष्टः । पूजितः । मिन्नः । बहुवचनात्, शीलितरक्षितादयः ॥१७॥

९७१) भविष्यति गम्यादिः ॥१८॥

गम्यादयो भविष्यत्यर्थे इन्नाद्यन्ताः स्युः । ग्रामंगमी । आगामी ॥१८॥

९७२) क्रियार्थक्रियायां तुम्णकचौ ॥१९॥

क्रियायां क्रियार्थायामुपपदे सत्यां भविष्यदर्थाद् धातोरेतौ स्याताम् । पक्तुं, पाचको वा, याति । क्रियार्थायां किम् ? भिक्षिष्ये इत्यस्य जटाः । शक्यार्थकालवेलासमयेषु तुम् । शक्तोऽलं भोक्तुम् । कालो भोक्तुम् ॥१९॥

९७३) भाववाचिनः ॥२०॥

क्रियार्थायां क्रियायामुपपदे भविष्यदर्थाद् धातोर्भाववाचिप्रत्ययाः स्युः । पाकाय, पक्तये पचनाय वा, याति ॥२०॥

९७४) अण् कर्मणः ॥२१॥

क्रियार्थायां क्रियायामुपपदे कर्मणः पराद् भविष्यत्यर्थाद् धातोरण् स्यात् । शरलावो याति ॥२१॥

(इति श्रीमदञ्चलगच्छेश्वर श्री मेरुतुङ्गसूरिविरचितयोः कृत्सूत्रवृत्योः (चतुर्थाध्याये) चतुर्थः पादः ॥)

(अथ पञ्चमः पादः ।)

९७५) भावाकर्त्रोर्घञ् ॥१॥

भावे कर्तृवर्जे च कारके धातोर्घञ् स्यात् । पाकः । आहारः । अकर्तृ किम् ? नदः ॥१॥

९७६) यथोक्तमल्क्यादयश्च ॥२॥

सोपसर्गाद् अनुपसर्गात् सनाम्नो वा यस्माद् धातोः भावाकर्त्रो यथोक्तस्तथा घञ् अल् क्यादयश्च स्युः । संरावः । अध्यायः । उच्छ्रायः । भावः । कायः । अल् । प्रभवः । संयमः । संयामः । युवर्णऋद्दमादिभ्योऽलेव । जयः । क्रयः । द्रवः । लवः । गरः । गमः । आदरः । किः । आदिः । निधिः । वार्धिः ।ड। परिघः । न । प्रश्नः ॥२॥

९७७) द्वितोऽथुः ॥३॥

द्वनुबन्धाद् धातोर्भावाकर्त्रोरथुः स्यात् । वेपथुः ॥३॥

९७८) ड्वितस्त्रिमक् तत्कृतम् ॥४॥

ड्वनुबन्धाद् धातोर्भावाकर्त्रोस्तेन धात्वर्थेन तत्कृतमित्यर्थे त्रिमक् स्यात् । भृत्रिमम् ॥४॥

९७९) स्त्रियां क्तिः ॥५॥

स्त्रीलिङ्गधातोर्भावाकर्त्रोः क्तिः स्यात् । कृतिः । बुद्धिः । स्तुतिः । श्वादिभ्यो वा । श्रुतिः । श्रुतः । पक्षे यथाप्राप्ताः क्विबादयः । प्रतिश्रुत् । इष्टिः । इच्छा । विधिवत् । क्यप् । शयाः । भृत्याः । क्रिया । जागर्या ॥५॥

९८०) क्तेटो गुरोर्व्यञ्जनादः ॥६॥

क्त इट् यस्माद् गुरुमतो व्यञ्जनान्ताद् धातोः स्त्रियां भावकर्त्रोरः स्यात् । ईहा ॥६॥

९८१) शंसिप्रत्ययात् ॥७॥

शंसः प्रत्ययान्ताच्च स्त्रियां भावकर्त्रोरः स्यात् । प्रशंसा । गोपाया । चिकीर्षा ॥७॥

९८२) षिद्भ्योऽङ् ॥८॥

षानुबन्धाद् धातोः स्त्रियां भावकर्त्रोरङ् स्यात् । घटा ॥८॥

९८३) भिदादिभीषिमुख्येभ्यः ॥९॥

भिदा । छिदा । भीषा । चिन्ता ॥९॥

९८४) उपसर्गादातः ॥१०॥

उपदा । सन्धा । आख्या ॥१०॥

९८५) मृगयेच्छायाच्ञाद्याः ॥११॥

(निपात्यन्ते) ॥११॥

९८६) कारितान्तेभ्योऽनः ॥१२॥

अस्मात् स्त्रियां भावाकर्त्रोरनः स्यात् । भावना ॥१२॥

९८७) वेत्तिमुख्येभ्यः ॥१३॥
वेदना । घट्टना ॥१३॥

९८८) क्रुत्सम्पदादिभ्यः क्विप् ॥१४॥
एभ्यः स्त्रियां भावाकर्त्रोः क्विप् स्यात् । क्रुत् । सम्पत् । विपत् ॥१४॥

९८९) नञोऽनिः शापे ॥१५॥
नञः पराद् धातोः शापे गम्ये स्त्रियां भावाकर्त्रोरनिः स्यात् । अजनिस्ते भूयात् ॥१५॥

९९०) प्रश्नाख्याने न वेञ् ॥१६॥
प्रश्ने आख्याने च गम्ये स्त्रियां भावाकर्त्रोरिञ् वा स्यात् । का त्वं कारिं क्रियां कृत्यां कृतिं कारिकां वाऽकार्षीः । सर्वां कारिं क्रियामित्यादि ॥१६॥

९९१) पर्यायार्हणोत्पत्तौ च णकः ॥१७॥
एष्वर्थेषु प्रश्नाख्यानयोश्च स्त्रियां भावाकर्त्रोर्द्धातोर्णकः स्यात् । तवासिका । अर्हसि धारयसि वेक्षुभक्षिकाम् । उत्पन्नेक्षुभक्षिका । का कारिकाऽभूत् । सर्वा कारिकाऽभूत् ॥१७॥

९९२) नाम्नि च ॥१८॥
प्रच्छर्दिका ॥१८॥

९९३) भावे ॥१९॥
स्त्रियां भावे णकः स्यात् । शायिका ॥१९॥

९९४) क्लीबे क्तः ॥२०॥
धातोर्नपुंसके भावे क्तः स्यात् । हसितम् ॥२०॥

९९५) अनट् ॥२१॥
धातोर्नपुंसके भावेऽनट् स्यात् । स्थानम् । यानम् ॥२१॥

९९६) करणाधारयोः ॥२२॥
पृथग्योगात् क्लीबे निवृत्तम् । करणाधारयोर्धातोरनट् स्यात् । भेदनो दण्डः । लेखनी । दोहनी ॥२२॥

९९७) पुंनाम्नि घः ॥२३॥
करणाधारयोर्धातोः पुंसि संज्ञायां घः स्यात् । करः । लयः ॥२३॥

९९८) व्यञ्जनाद् घञ् ॥२४॥
वेदः । आचारः ॥२४॥

९९९) इकिश्तिव् स्वरूपार्थयोः ॥२५॥
धातोः स्वरुपेऽर्थे च वाच्ये एते स्युः ।इ। भजिः । कि । क्रुधिः । श्तिव् । वेत्ति । अर्थे । यजेरङ्गम् । भुजिः क्रियते । अस्तिरत्र ॥२५॥

१०००) कृच्छ्रे दूरोऽकृच्छ्रे स्वीषद्भ्यां च खल् ॥२६॥

कृच्छ्रार्थवृत्तेर्दुरोऽकुच्छ्रार्थवृत्तिस्वीषदभ्यां च पराद् धातोः खल् स्यात् । दुःशयम् । दुष्करः । सुशयम् । सुकरः । ईषच्छयम् । ईषत्करः ॥२६॥

१००१) च्व्यर्थे कर्तृकर्मभ्यां भूकृञोः ॥२७॥

कृच्छ्राकृच्छ्रार्थदुःस्वीषद्भ्यश्चार्थवृत्तिकर्तृभ्यां परो यथाक्रमं भूकृञोः खल् स्यात् । दुराढयंभवम् । स्वाढ्यंभवम् । ईषदाढयंभवं त्वया । दुराढयंकरः । स्वाढयंकरः । ईषदाढयं करोऽसौ मया ॥२७॥

१००२) अदरिद्राङ्भ्योऽनः ॥२८॥

कृच्छ्राकृच्छ्रार्थदुःस्वीषद्भ्यो दरिद्रावर्जाकारान्तेभ्योऽनः स्यात् । दुष्पानम् । सुपानम् । ईषत्पानम् । अदरिद्रा किम् ? दुर्दरिद्रः ॥२८॥

१००३) शासुयुधिदृशिधृषिमृषां च ॥२९॥

दुःशासनः । दुर्योधनः । इत्यादि ॥२९॥

१००४) आवश्यकाधमर्णयोर्णिन् ॥३०॥

अवश्यम्भावे गम्येऽधमर्णे च कर्तरि धातोर्णिन् स्यात् । कारी । अवश्यङ्कारी । दायी शतम् ॥३०॥

(इति श्रीमदञ्चलगच्छेश्वर श्री मेरुतुङ्गसूरिविरचितयोः कृत्सूत्रवृत्त्योः (चतुर्थध्याये) पञ्चमः पादः ॥)

(अथ षष्ठः पादः ।)

१००५) निषेधेऽलंखल्वोःक्त्वा वा ॥१॥

निषेधार्थयोरलंखल्वोरुपपदयोर्धातोः क्त्वा वा स्यात् । अलङ्कृत्वा । खलुकृत्वा । पक्षे । अलं रुदितेन ॥१॥

१००६) एककर्तृकयोः प्राक्काले ॥२॥

एककर्तृकयोर्धातोर्मध्ये पूर्वकाले वर्तमानाद् धातोः क्त्वा वा स्यात् । पीत्वा याति ॥२॥

१००७) निमील्यादिभ्योऽप्राक्कालेऽपि ॥३॥

चक्षुर्निमील्य हसति । भिन्नकर्तुकेऽपि । प्रियं दृष्ट्वा सुखं स्यात् ॥३॥

१००८) ख्णम् चाभीक्ष्ण्ये ॥४॥

एककर्तृकयोर्धात्वोर्मध्ये पूर्वकाले आभीक्ष्ण्ये ख्णम् क्त्वा च वा स्यात् । भोजं भोजं याति । भुक्त्वा भुक्त्वा याति ॥४॥

१००९) पूर्वाग्रप्रथमेषु ॥५॥

पूर्वं भोजं (याति) । अग्रे भोजं (याति) । प्रथमं भोजं याति । पक्षे । पूर्वं भुक्त्वेत्यादि ॥५॥

१०१०) शापे कर्मणः कृगः ॥६॥
कर्मणः पराद् एककर्तृकात् कृगः शापे गम्ये ख्णम् वा स्यात् । चोरंकारमाक्रोशति ॥६॥
१०११) अन्यथैवं कथमित्थमः ॥७॥
अन्यथाकारम् । एवंकारम् । कथंकारम् । इत्थंकारम् ॥७॥
१०१२) तथायथादीर्ष्योत्तरे ॥८॥
यथाकारं (भोक्ष्ये) । तथाकारं भोक्ष्ये ॥८॥
१०१३) विद्दृग्भ्यः कात्स्न्र्ये णम् ॥९॥
कात्स्न्र्यवतः कर्मणः परादेककर्तृकेभ्यो विदिभ्यो दृशेश्च णम् वा स्यात् । भिक्षुवेदं भोजय । कन्यादर्शं वरय ॥९॥
१०१४) यावतो विन्दजीवयोः ॥१०॥
यावद्वेदं भुङ्क्ते । यावज्जीवं पठ ॥१०॥
१०१५) चर्मोदराभ्यां पूरेः ॥११॥
चर्मपूरं (शेते) । उदरपूरं शेते ॥११॥
१०१६) चेलार्थात् क्नोपेः ॥१२॥
चेलक्नोपं वृष्टः ॥१२॥
१०१७) गात्रपुरुषाभ्यां स्नः ॥१३॥
गात्रस्नायं (वृष्टिः) । पुरुषस्नायं वृष्टः ॥१३॥
१०१८) शुष्कचूर्णरूक्षात् पिषस्तस्यैव ॥१४॥
एभ्यः कर्मभ्यः परात् पिषस्तस्यैव धातोः सम्बन्धे णम् वा स्यात् । शुष्कपेषं (पिनष्टि । एवं) चूर्णपेषं, रूक्षपेषं, पिनष्टि ॥१४॥
१०१९) जीवाद्ग्रहः ॥१५॥
जीवग्राहं गृह्णाति ॥१५॥
१०२०) निमूलात् कषः ॥१६॥
निमूलकाषं कषति ॥१६॥
१०२१) हनश्च समूलात् ॥१७॥
समूलघातं हन्ति ॥१७॥
१०२२) करणेभ्य ॥१८॥
पाणिघातं हन्ति ॥१८॥
१०२३) हस्तार्थाद् ग्रहेः ॥१९॥
हस्तग्राहं करग्राहं गृह्णाति ॥१९॥

१०२४) आधाराद् बन्धेः ॥२०॥

चारकबन्धं बद्धः ॥२०॥

१०२५) कर्तृजीवान्नशः ॥२१॥

जीवनाशं नष्टः ॥२१॥

१०२६) ऊर्ध्वात् पूःशुषः ॥२२॥

ऊर्ध्वपूरं पूर्णः । ऊर्ध्वशोषं शुष्कः ॥२२॥

१०२७) कर्मकर्तृभ्यामिवाभ्याम् ॥२३॥

कर्तुः कर्मणश्चोपमानात् धातोस्तस्यैव सम्बन्धे णम् वा स्यात् । स्वर्णनिधायं निहितः । काकनाशं नष्टः ॥२३॥

१०२८) तृतीययोपदंशेः ॥२४॥

तृतीयान्तेन योगे उपदंशेर्णम् वा स्यात् । मूलकेनोपदंशं भुङ्क्ते । मूलकेनोपदश्य भुङ्क्ते ॥२४॥

१०२९) सप्तम्या च प्रमाणासत्त्योः ॥२५॥

सप्तम्यन्तेन तृतीयान्तेन च योगे प्रमाणे आसत्तौ च गम्यायां धातोर्णम् वा स्यात् । द्वयङ्गुले द्व्यङ्गुलेन वोत्कर्षं द्वयङ्गुलोत्कर्षं गण्डिकाश्छिनत्ति । केशेषु (ग्राहं) केशैर्ग्राहं केशग्राहं युध्यन्ते ॥२५॥

१०३०) पञ्चम्या त्वरायाम् ॥२६॥

पञ्चम्यन्तेन योगे त्वरायां गम्यमानायां धातोर्णम् वा स्यात् । शय्याया उत्थाय शय्योत्थायं धावति ॥२६॥

१०३१) द्वितीयया ॥२७॥

लोष्टान् ग्राहं लोष्टग्राहं लोष्टान् गृहीत्वा वा युध्यन्ते ॥२७॥

१०३२) स्वाङ्गेनाधुवेण ॥२८॥

भ्रुवौ विक्षेपं भ्रूविक्षेपं भ्रुवौ विक्षिप्य वा वक्ति ॥२८॥

१०३३) नाम्ना ग्रहादिशोः ॥२९॥

नामानि ग्राहं, नामग्राहं, नाम गृहीत्वा दत्ते । एवं नामान्यादेशं नामादेश्यम् ॥२९॥

१०३४) तूष्णीमाभुवो णम् ॥३०॥

क्त्वो तूष्णीमा योगे भुवो णम्क्त्वौ स्याताम् । तूष्णींभूय, तूष्णीं भूत्वा गतः ॥३०॥

१०३५) अनञोऽव्ययात् क्त्वो यप् ॥३१॥

नञवर्जाद् अव्ययात् परं यदुत्तरपदं तदवयवस्य क्त्वो यप् स्यात् । प्रकृत्य । अनञ् किम् ? अकृत्वा । अव्ययात् किम् ? परमकृत्वा । अलङ्कृत्वा ॥३१॥

१०३६) क्तेऽनिटश्चजोः कगौ धुट् घिति ॥३२॥

क्तेऽनिटो धातोश्चजोर्धुटि घ्यनुबन्धे च यथासंख्यं कगौ स्याताम् । पक्ता । त्यक्ता ।

पाकः । भोग्यम् । क्तेऽनिटः किम् ? सङ्कोचः । कूजः ॥३२॥

१०३७) न्यङ्क्वादयः ॥३३॥

न्युङ्कुः । शोकः ॥३३॥

१०३८) नावश्यकघ्यणि ॥३४॥

आवश्यकघ्यणि चजोः कगौ न स्याताम् । अवश्यपाच्यम् । अवश्यरञ्ज्यम् । अन्यत्र, पाक्यम् ॥३४॥

१०३९) वचोऽशब्दे ॥३५॥

अशब्दविषये वचो घ्यणि को न स्यात् । वाच्यम् । शब्दे न । वाक्यम् ॥३५॥

१०४०) यजत्यजोः ॥३६॥

अनयोर्घ्यणि गो न स्यात् । याज्यम् । त्याज्यम् ॥३६॥

१०४१) निप्राभ्यां युजः शक्ये ॥३७॥

आभ्यां युजः शक्ये गम्ये घ्यणि गो न स्यात् । नियोज्यः । प्रयोज्यः । शक्ये किम् ? नियोग्यः ॥३७॥

१०४२) भुजो भक्ष्ये ॥३८॥

भक्ष्यार्थभुजो घ्यणि गो न स्यात् । भोज्यं पयः । भक्ष्ये किम् ? भोग्या भूः ॥३८॥

१०४३) मो नो म्वोः ॥३९॥

धातोर्मो मवयोः परयोर्नः स्यात् । जगन्मि । जगन्वः । जगन्वान् ॥३९॥

१०४४) क्वावयस्वरे ॥४०॥

धातोर्मो यस्वरविषयवर्जं क्वो न स्यात् । प्रशान् । प्रशान्भ्याम् । अयस्वरे किम् ? प्रशम्य। प्रशामौ ॥४०॥

१०४५) धूगोदितां वेट् ॥४१॥

धूग औदनुबन्धस्य च प्राप्ताविड् वा स्यात् । धोता । धविता । राद् वा । रधिता ॥४१॥

१०४६) निष्कुषोऽक्तयोः ॥४२॥

निष्कोष्टा । निष्कोषिता । तयोर्नित्यम् । निष्कुषितः ॥४२॥

१०४७) ऊदितो वा क्त्वि ॥४३॥

ऊदनुबन्धात् क्त्वि परे वेट् स्यात् । दान्त्वा । दमित्वा ॥४३॥

१०४८) जृव्रश्च्योः ॥४४॥

अनयोः क्त्विव इट् स्यात् । जरित्वा । व्रश्चित्वा ॥४४॥

१०४९) क्षुधवसोः क्तयोश्च ॥४५॥

अनयोः क्तयोः क्त्वि च परे इट् स्यात् । क्षुधितः । उषितवान् । उषित्वा ॥४५॥

१०५०) पूङ्क्लिशोर्वा ॥४६॥
पूतः । पवितः । क्लिष्ट्वा । क्लिशित्वा ॥४६॥

१०५१) अर्तीण्घसेकस्वरातां क्वसोः ॥४७॥
एषामेव क्वसाविट् स्यात् । आरिवान् । ईयिवान् । जक्षिवान् । आदिवान् । पेचिवान् । ददिवान् । एषां किम् ? बभज्वान् ॥४७॥

१०५२) गमहनविद्लृविशदृशां वा ॥४८॥
जग्मिवान् । जगन्वान् ॥४८॥

१०५३) न श्र्युवर्णल्वृतां किति ॥४९॥
एषां कानुबन्धे सार्वधातुके नेट् स्यात् । श्रितः । युत्वा । लूत्वा । वृतः । कीर्णः ॥४९॥

१०५४) कृदघोषवत्योः ॥५०॥
कृत्संज्ञे घोषवतितो च परे धातोर्नेट् स्यात् । ईश्वरः । दीप्रः । दीप्तिः । जागर्तिः ॥५०॥

१०५५) तेर्ग्रहादिभ्यस्त्विट् ॥५१॥
निगृहीतिः ॥५१॥

१०५६) सहलुभेच्छरुषरिषां वा तादौ ॥५२॥
सोढा । सहिता । रेष्टुम् । रेषितुम् ॥५२॥

१०५७) डीयश्व्यैदिद्वेटामपतो निष्ठायाम् ॥५३॥
एषां पतवर्जानां निष्ठायां नेट् स्यात् । डीनः । शूनवान् । त्रस्तः । रुद्धवान् । अपतः किम् ? पतितः ॥५४॥

१०५८) श्वसादेर्वा ॥५४॥
श्वस्तः । श्वसितः ॥५४॥

१०५९) आदिताम् ॥५५॥
आकारेतो निष्ठायां नेट् स्यात् । मिन्नः । मिन्नवान् । भावारम्भयोर्वा । मिन्नम् । मेदितम् । प्रमिन्नवान् । प्रमेदितवान् ॥५५॥

१०६०) रात् तो नोऽमूर्च्छः ॥५६॥
मूर्च्छवर्जरेफात् परस्य निष्ठातो नः स्यात् । पूर्णः । गूर्णवान् । अमूर्च्छः किम् ? मूर्तः ॥५६॥

१०६१) दाद्दस्यचामदः ॥५७॥
मदवर्जं दात् परस्य निष्ठातो धातुदस्य च नः स्यात् । भिन्नः । भिन्नवान् । अमदः किम् ? मत्तवान् ॥५७॥

१०६२) संयुक्तान्तस्थातोऽख्याध्यः ॥५८॥
ख्याध्यावर्जसंयुक्तान्तस्थापराद् आकारान्निष्ठातो नः स्यात् । स्त्यानः । श्राणः । ग्लान-

वान् । अख्याध्यः किम् ? ख्यातः । ध्यातः ॥५८॥

१०६३) ह्रीघ्राध्रात्रोन्दनुदविन्तेर्वा ॥५९॥

ह्रीणः । ह्रीतवान् ॥५९॥

१०६४) सूयत्याद्योदिताम् ॥६०॥

नवानां सूयत्यादीनाम् ओदितां च निष्ठातो नः स्यात् । सूनः । दूनवान् । लग्नवान् ॥६०॥

१०६५) व्रश्चेः कच् ॥६१॥

व्रश्चेर्निष्ठातो नो, धात्वन्तस्य च कः स्यात् । वृक्णः ॥६१॥

१०६६) दुगोरू च ॥६२॥

दूनः । गूनवान् ॥६२॥

१०६७) क्षेः क्षी चाभावकर्मणोः ॥६३॥

क्षेः परस्य भावकर्मवर्जो निष्ठातो नः, क्षेः क्षी च स्यात् । क्षीणः । क्षीणवान् । भावकर्मणोः क्षितमस्य । प्रक्षितोऽसौ तेन ॥६३॥

१०६८) क्षैशुषिपचां मकवाः ॥६४॥

एषां निष्ठातो यथासंख्यं मकवाः स्युः । क्षामः । शुष्कवान् । पक्वः । पक्ववान् ॥६४॥

१०६९) ऋल्वादेरप्रोर्न क्तेश्च ॥६५॥

पृवर्जऋदन्तात् ल्वादिभिश्च निष्ठायाः क्तेश्च तो नः स्यात् । तीर्णः । तीर्णवान् तीर्णिः । लूनः । लूनवान् । लूनिः । धूनवान् । अप्रः किम् ? पूर्तिः । पूर्तः ॥६५॥

१०७०) अवर्णादूटो वृद्धिः ॥६६॥

धातोरधातोर्वाऽवर्णात् परस्य ऊटो वृद्धिः स्यात् । धौतः । अवनमूतिः । पटस्योति पटौतिः । जनानवतीति जनौतिः । वृद्धिग्रहणं मङ्गलार्थम् ॥६६॥

इति श्रीमेरुतुङ्गसूरिविरचितयोःकृत्सूत्रवृत्त्योः (चतुर्थाध्याये) षष्ठः पादः सम्पूर्णः ॥

समाप्तमिदं मेरुतुङ्गबालावबोधव्याकरणम् ॥